॥ वेदान्तनामरत्नसहस्रम् ॥

श्रीपरमशिवेन्द्रसरस्वतीप्रणीतम्

श्रीमत्परमहंसपरिव्राजकाचार्याभिनवनारायणेन्द्रसरस्वतीपूज्यपादशिष्य

श्रीमत्परमशिवेन्द्रसरस्वतीविरचिते

वेदान्तनामरत्नसहस्रव्याख्याने स्वरूपानुसन्धानाख्ये

अकारादिवर्णानुक्रमेण नाम्नां अनुक्रमणिका

००१

अकरणम्

अकरणम्—अन्तःकरणरहितम् ।

अकर्णः

अकर्णः—कर्णरहितः । सर्वेन्द्रियरहितोऽपि सर्ववृत्तिसाक्षीत्यर्थः ।

अकर्ता

अकर्ता—कर्तृत्वादिसर्वसंसाररहितः ।

अकलः

अकलः—न विद्यन्ते प्राणादिकला 'यस्मिन्नित्यकलः।

अकामं रूपम्

अकामं रूपम्—

काम्यन्त इति कामाः विषयाः तद्रहितं रूपम्।

अकायम्

अकायम्। अशरीरं लिङ्गशरीरवर्जितमित्यर्थः।

अकारः

अकारः—प्रत्यगात्मा। ननु अकारस्य प्रत्यगात्मपरत्वं कथमप्रसिद्धत्वात् इति चेन्न, श्रुत्यैव प्रतिपादनात्। तथाहि—**अथैषो एवाकार आप्ततमार्थः** इति। अत्र एवकारो भिन्न-क्रमः। अकार आप्ततमार्थ एव, व्याप्ततमार्थ एवेत्यर्थः। स च व्याप्ततमार्थः कः यस्मिन् अकारस्य वृत्तिर्भवति इत्यत आह श्रुतिः—आत्मन्येवेति—प्रत्यगात्मन्येवेत्यर्थः।

अकृतः

अकृतः—नित्यः, अभयः, अमृतः अचलः, कूटस्थः, ध्रुवो, मोक्षरूपः। स नित्यप्राप्तोऽपि अज्ञानेनावृतस्सन्नाभिव्यज्यते, ज्ञानादज्ञाननिवृत्तौ स्वयमेवाविर्भवति, तस्मान्न कर्मणां मोक्षहेतुत्वम्, किन्तु संशयविपर्यासरहितनिष्प्रपञ्चब्रह्मात्मत्वसाक्षात्काररूपसम्यग्ज्ञानेनैवाविर्भावः। न च वाच्यं **'यस्यैते चत्वारिंशत् सस्काराः स ब्रह्मणस्सायुज्यं सालोक्यञ्च गच्छति' 'कर्मणैव हि संसिद्धिमास्थिता जनकादयः'** इत्यादिवाक्य-पर्यालोचनया कर्मणामपि मोक्षहेतुत्वं सम्भवतीति। मोक्षस्य कर्मसाध्यत्वे स्वर्गादिवदनित्यत्वापातात्। न विज्ञानसमुच्चितस्य। तस्य कार्यब्रह्मप्राप्तिसाधनत्वात्।

अक्रतुः

अक्रतुः—विविधभोगसंकल्परहित इत्यर्थः । परमानन्दस्वरूपत्वात् । तथा च मुमुक्षुरपि बन्धरूपं भोगसंकल्पं त्यक्त्वा परमानन्दरूपं परमात्मानमात्मत्वेन ज्ञात्वा विमुक्तो भवतीति ।

०१०

अखण्डबोधम्

अखण्डबोधम्— अपरिच्छिन्नज्ञानस्वरूपम् ।

अगन्तव्यम्

अवक्तव्यं अनादातव्यम् अगन्तव्यम् अविसर्जयितव्यम् अनानन्दयितव्यम्—
एभिः नामभिः कर्मेन्द्रियविषयत्वनिषेधः ।

अगन्धम्

अगन्धम्—गन्धभिन्नम् ।

अगन्धवत्

अशब्दम् । अस्पर्शम । अरूपम् । अव्ययम् । अरसम् । अगन्धवत् । अनादि ।

अत्र अकारादीनि नामानि सप्त श्रूयन्ते । यद्यप्यनन्तशब्दोऽप्यत्रान्ते दृश्यते, तस्याप्यकारादित्वात् ग्रहणेन भवितव्यम् ; तथापि केनोपनिषदि अनन्तशब्दस्य गृहीतत्वान्नपुनरत्र गृह्यते । अत्र अशब्दमिति शब्दरहितम्, अस्पर्शमिति स्पर्शरहितम्, अरूपमिति नोलपीतादिरूप निर्मुक्तम् अरसमिति रसरहितम्, अगन्धवदिति गन्धरहितमुक्तम् । अनेन शब्दस्पर्शरूपरसगन्धानां निषेधेन ब्रह्मणः परमसूक्ष्मत्वं प्रदर्शितं भवति । यत्रैते गुणा वर्तन्ते सा स्थूला तावदियं पृथिवी शब्दस्पर्शरूपरसगन्धोपचिता दृश्यते, सर्वेन्द्रियविषयभूता च । तथा शरीरम् । तत्रैकैकगुणापकर्षे सूक्ष्मत्वमहत्त्वशुद्धत्वनित्यत्वादितारतम्यं दृष्टमबादिषु यावदाकाशमिति एते गन्धादयस्सर्व एव स्थूलत्वादिकारणभूताः शब्दान्ताः यत्र न सन्ति किमु तस्य सूक्ष्मत्वाद्यतिशयवत्वं वक्तव्यमित्येतद्दर्शयति श्रुतिः । अशब्दस्पर्शमरूपमरसमगन्धवच्च यदेतत् ब्रह्म तदेव **अव्ययम्** । शब्दादिमत्त्वाभावात् । यच्छब्दादिमत्तत् व्येति यथा पृथिव्यादि । अत एव **अनादि** उत्पत्ति रहितम्, यदुत्पत्तिमत् तद्विनाशि, यथा घटादि, इदं त्वविनाशि, तस्मादुत्पत्तिरहितम् । उत्पन्नस्य भावस्य विनाशनियमात् । तस्मात् ब्रह्म परमसूक्ष्ममिन्द्रियागोचरमुत्पत्तिविनाशरहितं इत्यभिप्रायः ।

अगुणम्

अगुणम्—गुणसामान्यरहितम् ।

अगृह्यः

अगृह्यः—न गृह्योऽगृह्यः । यस्मात् सर्वकार्यधर्मातीतः तस्मात् अगृह्यः । यद्धि करणगोचरं व्याकृतं वस्तु तत् ग्रहणगोचरम्, इदन्तु तद्विपरीतमात्मतत्वम् ; तस्मात् अगृह्यः ।

अगोत्रम्

अगोत्रम्—गोत्रमन्वयोमूलमित्यनर्थान्तरम्, तद्रहितं अनन्वयमित्यर्थः । न हि तस्य मूलमस्ति, येनान्वितं स्यात् ।

अग्निरसि

अग्निरसि—तेजोहेतुः त्वमग्नेरसि । त्वदीयेन तेजसा अग्निस्तेजस्वीत्यर्थः ।

अग्नेरन्तरः

अग्नेरन्तरः

अन्तरिक्षे तिष्ठन्

अन्तरिक्षादन्तरः

अर्थस्तु पूर्ववत्।

अग्नौ तिष्ठन्

अर्थस्तु पूर्ववत्।

०२०

अग्र्यम्

अग्र्यम्—अग्रे भवमग्र्यम्, सर्वस्मात् प्रपञ्चात् पुरतो विद्यमानमित्यर्थः।

अग्राह्यम्

अग्राह्यम्—कर्मेन्द्रियाविषयमिति यावत्।

अघोरा

अघोरा—अविद्यातत्कार्यविनिर्मुक्ता शशिबिम्बमिवाह्लादिनी; परमानंदरूपत्वात्।

अङ्गुष्ठमात्रः

अङ्गुष्ठमात्रः—अङ्गुष्ठपरिमाणहृदयपुण्डरीकान्तश्छिद्रवर्त्यन्तःकरणोपाधिः अङ्गुष्ठमात्रवंशपर्वान्तर्वर्त्याकाशवत्। न हि स्वभावतः सर्वव्यापिनोऽतिमात्रस्य परमात्मनोऽङ्गुष्ठमात्रत्वमुपपद्यते। न चान्यः परमात्मन इह ग्रहणमर्हति। उत्तरत्र ईशानं भूतभव्यस्येति ईशानश्रुतिविरोधात्।

अचक्षुः

अचक्षुः—चक्षुर्विहीनः ।

अचक्षुःश्रोत्रम्

अचक्षुःश्रोत्रम्—चक्षुःश्रोत्रोपलक्षितज्ञानेन्द्रियशून्यम् ।

अचक्षुष्कम्

अचक्षुष्कम् । न हि चक्षुरस्य करणं विद्यत इत्यतः अचक्षुष्कम् ।

अचलः

अचलः—गमनादिक्रियारहितः ।

अचिन्त्यम्

अचिन्त्यम्—अन्तःकरणवृत्त्यविषयभूतम् ।

अदृश्यम्, अव्यवहार्यम्, अलक्षणम्, अव्यपदेश्यम्, अद्वैतम् -

अनेन नामषट्केन सर्वव्यवहारातीतः सच्चिदानन्दरूपः एकः अद्वयः प्रत्यगात्मा बोधितः ।

एवं प्रत्यगात्मनि यदा प्रतिबुद्धः तदा-संसारविनिर्मुक्तो भवति ।

अचिन्त्यरूपम्

अचिन्त्यरूपम्—न चिन्तयितुं शक्यते अस्य रूपमिति अचिन्त्यरूपं, सर्वप्रत्ययाविषयस्वभावमिति यावत्। ननु आत्मा चेतनरूपः सर्वगतः सर्वप्रपञ्चविलक्षणोऽस्तीत्येवं चिन्तयितुं शक्यत्वात् कथमचिन्त्यरूपत्वमात्मन इति चेन्न, आत्मनश्चेतनत्वं नाम चेत्यप्रकाशकत्वं, तच्च चेत्यं विनाऽनुपपन्नं आत्मव्यतिरेकेण परमार्थतश्चेत्यस्यासंभवात्, अतः आत्मनश्चेतनत्वं न संभवति। तथा सर्वगतत्वमपि न सम्भवति, गमनक्रियाया अभावात्। एवं प्रपञ्चविलक्षणत्वमपि न संभवति स्वव्यतिरिक्तप्रपञ्चस्याभावात्, इत्थं अस्तित्वमपि न सम्भवति, आश्रयाभावात्। तस्मादुपपन्नमचिन्त्यरूपत्वमात्मनः। नन्वेवं चेत् वरघाताय कन्याविवाहन्यायवत् आत्मनोऽचिन्त्यस्वरूपत्वप्रदर्शनेन शून्यत्वमेवोपपादितमिति चेत्—मैवम्—अस्याः शङ्कायाः प्रश्नोत्तराभ्यां वासिष्ठरामायणे परिहृतत्वात्। तथा हि—कर्कटिप्रश्नः—

०३०

अचिन्त्यशक्तिः

अचिन्त्यशक्तिः—अचिन्त्या चिन्ताऽविषयीभूता चिच्छक्तिः तद्वान्। अथवा अचिन्त्याः चिन्तयितुमशक्याः इयत्तारहिताश्शक्तयो जगत्सर्गादौ सहकारित्वेन अपेक्षिताः यस्य सोऽचिन्त्यशक्तिः।

अचेतयितव्यम्

अमन्तव्यम् अबोद्धव्यम् अनहङ्कर्तव्यम् अचेतयितव्यम्—अनेन नामचतुष्टयेन अन्तःकरणवृत्तिविषयत्वप्रतिषेधः।

अछायम्

अछायम्—तमोवर्जितम्।

अच्युतः

अच्युतः। च्युतिरहितः। षड्भावविकाररहित इत्यर्थः।

अजः

अजः—जनिरहितः । उपलक्षणमेतत् ।षड्भावविकाररहित इत्यर्थः । भावविकाराश्च जायते आस्ति वर्धते परिणमते अपक्षीयते नश्यति इति ।

अजरम्

अजरम्—जरारहितम् ।

अजाग्रत्

अजाग्रत्—जाग्रदवस्थारहितः, अन्यथाज्ञानरहित इत्यर्थः ।

अजातः

अजातः—जन्मजरादिधर्मवर्जितः ।

अज्वलन्

अनुग्रः अवीरः अमहान् अविष्णुः अज्वलन् असर्वतोमुखः अनृसिंहः अभीषणः अभद्रः अमृत्युमृत्युः अनमामि अनहम्। अत्र उग्रादिपदार्थानवगमे अनुग्रादिपदार्थानामर्थबोधनं न संभवति। उग्रादिपदानाञ्च श्रुत्यैव अर्थो वर्णितः—सर्वसंहारसमर्थः परिभवासहः प्रभुः व्याप्तः सदोज्वलः अविद्याकार्यहीनः स्वात्मबन्धहरः सर्वदा द्वैतरहितः आनन्दरूपः सर्वाधिष्ठानसन्मात्रो निरस्ताविद्यातमोमोहोऽहमेवेतीति। सर्वसंहारसमर्थइत्यादिद्वादशपदानां भाष्यमेव लिख्यते। तत्र उग्रमित्यस्य पदस्य तुरीयबोधकतां दर्शयन् तस्यार्थमाह-सर्वसंहारसमर्थ इति। नहि तुर्या-दन्यस्य जडस्य सर्वसंहारसामर्थ्यं संभवति; अतस्सर्वसंहारसमर्थवाचक उग्रशब्दः सर्वद्वैतसंहारसमर्थं तुरीयमेव लक्षणया प्रकाशयतीत्यर्थः। लोके संहारसमर्थोऽपि मन्दप्रस्थानः कश्चित् संहार्यमसंहरन् दृष्ट इति तुरीयोऽपि तथा स्यादिति अस्यापि संहारसामर्थ्यं न निर्णेतुं शक्यत इत्याशङ्कायां तद्व्यावर्त-कत्वेन वीरमित्यपि पदं अर्थतः तुरीयप्रतिपत्तौ विनियोजयति-परिभवासह इति। न लौकिक-मन्दपुरुषवदयं मन्दप्रस्थानः परिभवसहिष्णुः, अतस्संहरत्येव सदा संहार्यमविद्यादिलक्षणं जगत्, ततश्च तत्सामर्थ्यमस्य निर्णेतुं शक्यत इत्यर्थः। परिभवासहिष्णुरपि प्रतिबन्धसंभवात् न संहरती-त्याशङ्कायां तद्व्यावर्तकत्वेन महाविष्णुमित्यत्र महत्पदमर्थतोऽवतारयति-प्रभुरिति। महाप्रभुत्वात् न प्रतिबन्धः शङ्क्य इत्यर्थः। समर्थस्य परिभवासहिष्णोः प्रतिबन्धहीनस्यापि सर्वत्र व्याप्त्य-भावेन सर्वसंहर्तृत्वं न संभवति साप्यनुपपत्तिरिह नास्तीति वदन् विष्णुमितिपदमर्थतोऽवतार-यति-व्याप्त इति। उक्तसामग्रीसंभवेऽपि येन प्रमाणेन अभिज्वलितस्सन् सर्वं संहरति तत्र

संहर्तुं युक्तमुपकारकत्वादित्याशंकायां निर्विकारत्वात् न प्रमाणसापेक्षमस्याभिज्वलनं, किन्तु सर्वद्वैत-विरुद्धस्वप्रकाशचिद्रूपत्वेन सदैवाभिज्वलितः सर्वदा संहृतसकलद्वैतश्च स परमार्थत इति वदन् ज्वलन्तमिति पदमवतारयति - सदोज्वल इति । तथापि लौकिकसंहर्तुरसंहार्यं रक्षणीयं वस्तु कार्यकरणादि दृष्टं, तद्वदस्य स्वाभाविकमसंहार्यं किमप्यभ्युपगन्तव्यमित्याशंकायां नास्य लौकि-कपुरुषवदविद्यातत्कार्ययोरहम्ममाभिमानोऽस्ति, येन असंहार्यं तद्रक्षणीयं स्यात्, तस्मात् स्वमहिमस्थो निरपेक्षस्सर्वमेव संहरतीति वक्तुं सर्वतोमुखमिति पदमर्थतोऽवतारयति-अविद्याकार्यहीन इति । सर्वतस्सर्वत्र मुखं यस्य । मुखशब्देन उपलब्धिः अविद्याकार्यासंस्पृष्टस्वप्रकाशा उच्यते । अतस्सर्वत्र उपलब्धिस्वरूप एवायं न विजातीयमसंहार्यं किमप्यत्रास्तीति सर्वतोमुखपदस्यार्थः । एवंरूपो महाप्रभुः किमर्थमतिदुर्बलद्वैतजातं संहरतीत्याकांक्षायां स्वानर्थप्रतिभासहेतुत्वादिति वदन् नृसिंहमितिपदमवतारयति - स्वात्मबन्धहर इति । नृ गताविति धातो रूपेण नृशब्देन त्रिविधपरिच्छेदरहित आत्मोच्यते । सीति तद्बन्धकमविद्यालक्षणद्वैतं, हमिति तत्संहर्तृत्वं उच्यते । अतः नृसिंहपदस्य स्वात्मसंबन्धहर इति अर्थोक्तिरुपपन्ना । नन्वेवंरूपत्वेऽपि एवं विवेकात् प्राक् यथा द्वैतं तत्पराभवसहिष्णुत्वञ्च तथैव सर्वदाऽस्त्वित्याशंकायां कदाचिदप्यस्य परमार्थतो न द्वैतपरिभव इति वदन् भीषणमिति पदमवतारयति - सर्वदा द्वैतरहित इति । न हि महास्फुरणस्व-भावमेनं तमः स्वनाशभयात् कदाचिदपि परमार्थतः स्पृशति मध्याह्नभास्करमिवेति भीषणपदार्थ इति भावः । ननु सर्वद्वैतसंहारे सुखसाधनाभावात् अपुरुषार्थत्वं स्यात्, अतः न सर्वं संहर्तव्य-मित्याशङ्क्य, स्वत एव परमानन्दानुभवरूपत्वमाह भद्रपदेन-आनन्दरूप इति । ननु नित्यस्य कारणस्यापि संहारे स्वात्मनोऽपि तत्प्रसंगः, अतो न संहर्तव्यं सर्वमित्याशङ्क्य अध्यस्तस्यात्मा-ज्ञानलक्षणस्य कारणस्य अधिष्ठानज्ञानेन नाशेऽपि परमार्थसद्रूपमनध्यस्तमबाधितं पूर्ववत् स्वमहिमस्थमेव भवति इति परिहरति मृत्युमृत्युपदेन----सर्वाधिष्ठानसन्मात्र इति । पूर्वमृत्युशब्देन मरणशीलं सर्वात्मकमज्ञानमुच्यते तस्य संहर्ता मृत्युमृत्युः, सदा मरणशीलमेवाज्ञानं नित्यं कल्पितम्, अयन्तु तन्मृत्युत्वेन सर्वदा अमृत एव, अतो न तन्नाशकस्य नाशप्रसङ्गः, किन्तु पूर्वमधिष्ठानत्वेन उत्तरत्र बाधावधित्वेन तत्साक्षित्वेनापि शिष्यते इति मृत्युमृत्युपदस्यार्थ इति भावः । यस्मादेवं सर्वसंहारसमर्थः परिभवासहो निष्प्रतिबन्धस्सर्वसंहार्यकबलीकरणस्वभावो निरपेक्षो रक्ष-णीयशून्यः स्वात्मबन्धहरो भयङ्करः परमानन्दानुभवः परमार्थसद्रूपोऽयमात्मेति नाविद्यालक्षण-

द्वैतमस्मिन् कदाचिदप्युपपद्यते, तस्मात् तदत्र कालत्रयेऽपि नास्तीति वदन् नमामीत्यस्यार्थमाह— निरस्ताविद्यातमोमोह इति। अविद्येति विद्याविरोधित्वकथनेन निवर्तयितुं शक्यतोक्ता ; तम इत्याच्छादकत्वेन निरसनीयत्वं ; मोह इति च विक्षेपहेतुत्वेन निरस्यत्वमुक्तं ; अविद्यादिलक्षणमनर्थकारणं नित्यमेव निरस्तं यस्मिन् स तथोक्तः। नमामीत्यत्र न कारो निषेधार्थः। मेति प्रमावाचकत्वेन परिपूर्णानन्दसच्चिद्रूपतुरीयवाचकः। मीति तद्धिंसाकरं तदाच्छादनविक्षेपादिकारणभूतमज्ञानमुच्यते। तस्मात् माहिंसाकारणं नास्तीति नमामिपदस्यार्थ इति भावः। उक्तञ्च-**मीति हिंसाकरं नात्र तमोऽज्ञानादिलक्षण**मिति। किन्तर्ह्यस्तीत्याकाङ्क्षायां तुरीयः प्रत्यगात्मेति वदन् अहंशब्दार्थमाह-अहमेवेतीति। एवकारोऽहंकारप्रसंगेन प्राप्तसर्वद्वैतनिषेधार्थः। तथा च उग्रमिति वाक्यजन्यवृत्त्यभिव्यक्तस्य तुरीयस्य सर्वसंहारकर्तृत्वमुच्यते। अनुग्रमिति तदाऽपि परमार्थतः स्वमहिमस्थिततया कूटस्थत्वेन परमार्थतः अकर्तृत्वमुच्यते। अथवा अनुग्रमित्ययमर्थः—उग्रत्वं नाम न धर्मः किन्तु स्वरूपमेवेति। एवमवीरमित्यत्रापि वीरत्वं नाम न धर्मः, किन्तु स्वरूपमेवेति योज्यम्।

अणिमा

अणिमा—अणुभावः जगतोमूलं, भाविभवित्रोरभेदविवक्षया। अणुः परमसूक्ष्म इत्यर्थः।

०४०

अणीयान्

अणीयान् अणुतरः

अणुभ्योऽणु

अणुभ्योऽणु—सूक्ष्मात् सूक्ष्मतरम्।

अणुः

अणुः परमसूक्ष्मः दुर्विज्ञाम इत्यर्थः। न तु परमाणुपरिमाणः, तस्य विभुत्वात्।

अणोरणीयान्

अणोरणीयान् अणोः श्यामाकादेरणीयान् अणुतरः। अतिसूक्ष्मवस्तुनः श्यामाकादेः स्वरूपमात्मैवेत्यभिप्रायः । न केवलमणोरेवात्मा स्वरूपं किन्तु महत्पदार्थस्याकाशादेरपीति।

अतमः

अतमः—अविद्याभिन्नम् ।

अतमस्कम्

असत्वम् अरजस्कम् अतमस्कम्—नामत्रयेण सत्वादिगुणत्रयनिषेधः ।

अतर्क्यम्

अतर्क्यम्—स्वबुद्ध्यूहाविषयम् । तथा हि स्वबुद्ध्यूहदोषवशादेव लोकायतिका-देहमेवात्मानं मेनिरे। बौद्धास्तु बुद्धिमेव। वैशेषिकादयस्तु अहंकारमेव कर्तृत्वभोक्तृत्वविशिष्टं

विभुमात्मेति मेनिरे । भाट्टास्तु सविकारमात्मानम्। सांख्यादयस्तु आत्मनानात्वं मेनिरे।

अतिच्छन्दाः

अतिच्छन्दाः—अतिच्छन्दमित्यर्थः, रूपपरत्वात् । छन्दः कामः अतिगतो यस्मात् रूपात् तत् अतिच्छन्दं रूपम् । अन्योऽसौ सान्तः छन्दश्शब्दो गायत्र्यादिछन्दोवाची ; अयन्तु कामवाची, अतः स्वरान्त एव । तथाऽपि अतिच्छन्दा इति पाठः स्वाध्यायधर्मो द्रष्टव्यः । अस्ति च लोके कामवचनः छन्दशब्दः स्वच्छन्दः परच्छन्दः इत्यादौ । अतः अतिच्छन्दमित्येवमुप-नेयम् । कामवर्जितमेतद्रूपमित्यर्थः ।

अतिज्वलन्

अत्युग्रः अतिवीरः अतिमहान् अतिविष्णुः अतिज्वलन् अतिसर्वतोमुखः अतिनृसिंहः अतिभीषणः अतिभद्रः अतिमृत्युमृत्युः अतिनमामि अत्यहम्—प्रत्यगात्मा हि ज्ञानबलेन एतत् सर्वं कार्यप्रपञ्चं कारणात्मन्युपसंहृत्य कारणात्मानमपि सर्वात्मना अन्तर्बहिश्च संव्याप्य चिद्रूपतामापाद्य स्वात्मतावन्मात्रतया विलाप्य स्वात्मानं चिद्रूपमेषां कार्यकारणरूपपदार्थानां ददाति, न हि तेषां स्वरूपान्तरमस्ति, कल्पितत्वात्, एतादृशः प्रत्यगात्मा अत्युग्रः। उग्रत्वगुणा-

अतिनमामि

पूर्वोक्तम् ---→ अतिज्वलन्

०५०

अतिनृसिंहः

पूर्वोक्तम् ---→ अतिज्वलन्

अतिभद्रः

पूर्वोक्तम् ---→ अतिज्वलन्

अतिभीषणः

पूर्वोक्तम् ---→ अतिज्वलन्

अतिमहान्

पूर्वोक्तम् ---→ अतिज्वलन्

अतिमृत्युमृत्युः

पूर्वोक्तम् ---→ अतिज्वलन्

अतिविष्णुः

पूर्वोक्तम् ---> अतिज्वलन्

अतिवीरः

पूर्वोक्तम् ---> अतिज्वलन्

अतिसर्वतोमुखः

पूर्वोक्तम् ---> अतिज्वलन्

अतिसूक्ष्मः

अतिसूक्ष्मः—विद्वद्बुद्धिगम्य इत्यर्थः।

अतेजस्कम्

अतेजस्कम्—अविद्यमानं तेजो यस्य तदतेजस्कम्, न हि तेजोऽग्न्यादिप्रकाशवत् अस्य विद्यते।

०६०

अत्ता

अत्ता—ब्रह्मक्षत्रादिसर्वचराचरसंहर्ता।

अत्यहम्

पूर्वोक्तम् ---> अतिज्वलन्

अत्युग्रः

पूर्वोक्तम् ---> अतिज्वलन्

दतिक्रान्तत्वे सत्युग्रत्वमत्युग्रत्वम् एवमतिवीर इत्यादिकमपि योज्यम्।:

अदीर्घम्

अस्थूलम्—स्थूलात् अन्यत्।
अनणु
अह्रस्वम्
अदीर्घम्
एभिश्चतुर्भिः विशेषणैः द्रव्यधर्माः प्रतिषिद्धाः।

अदृश्यम्

अदृश्यम्—ज्ञानेन्द्रियागम्यमित्यर्थः।

अदृश्यम्

पूर्वोक्तम् ---→ अचिन्त्यम्

अदृश्यम्—प्रत्यक्षादिप्रमाणैरनवलोक्यम्।

अदृश्यम्, अव्यवहार्यम्, अलक्षणम्, अचिन्त्यम्, अव्यपदेश्यम्, अद्वैतम् -

अनेन नामषट्केन सर्वव्यवहारातीतः सच्चिदानन्दरूपः एकः अद्वयः प्रत्यगात्मा बोधितः।

एवं प्रत्यगात्मनि यदा प्रतिबुद्धः तदा-संसारविनिर्मुक्तो भवति।

अदृष्टः

अदृष्टः—न दृष्टः न विषयीभूतः चक्षुर्दर्शनस्य कस्यचित्; चक्षुरगोचर इत्यर्थः।

अद्भुतम्

अद्भुतम्—आश्चर्यकरम्, सकलप्रपञ्चविलक्षणं परमानन्दरूपं ब्रह्मेत्यर्थः।

अद्वयोन्तरः

अद्धयोऽन्तरः—अबन्तर्यामितया वर्तमानः।

०७०

अद्वयम्

अद्वयम्—ज्ञातृज्ञेयादिविभागशून्यम्।

ननु ज्ञातृज्ञेयादिविभागस्य प्रत्यक्षसिद्धत्वात् कथं तच्छून्यता—मैवम्—द्वयस्य कल्पि- तत्वात्।

अद्वयत्वतः अशरीरतः-इति पदच्छेदः। इदं-मया प्रतिज्ञातं सत्यमेव। किन्तत्-मम-**आत्मनो नास्ति विक्रियेत्यादि।**

अद्वयानन्दविज्ञानघनः

अद्वयानन्दविज्ञानघनः—स्वगतसजातीयविजातीयभेदशून्यचिदानन्दैकरसः।

अद्वितीयम्

अद्वितीयम्—नास्य द्वितीयं वस्त्वन्तरं विद्यत इत्यद्वितीयम्, अनेन मृद्व्यतिरेकेण मृदो यथा अन्यत् घटाद्याकारेण परिणामयितृ कुलालादि निमित्तकारणं दृष्टं तथा सद्व्यतिरेकेण सतस्सहकारिकारणं द्वितीयं प्राप्तं प्रतिषिध्यते। स्वयमेव चेतनत्वेन निमित्तत्वसम्भवात्।

ननु चेतनत्वेऽपि कुलालस्य स्वव्यतिरिक्तमृद्रूपोदानापेक्षा दृष्टा, एवमत्रापि उपादानापेक्षा अस्तीति चेत्-मैवं-अभिन्ननिमित्तोपादानत्वसम्भवात्। श्रूयते हि **तदैक्षत बहुस्यां प्रजायेयेति** इति। तत्र ईक्षणेन निमित्तत्वं बहुभवनेनोपादानत्वञ्च अद्वितीयस्य सद्वस्तुनोऽवगम्यते। अतो जगतो निमित्तमुपादानं च स्वयमेवेत्यर्थः। ननु अविक्रियस्यासङ्गस्य सद्रूपस्य ब्रह्मणः कथमुभयविधकारणत्वं संभवति; माययेति चेत्, तर्हि तया द्वैतापत्तिरिति-मैवं-तस्यास्सद्रूपे ब्रह्मण्यध्यस्तत्वेन अनिर्वचनीयतया स्वतस्सत्ताऽभावात्। एवञ्च मायाशक्तिवशादविक्रियस्यापि ब्रह्मणस्स्रष्टृत्वादिकमुपपद्यते। नापि द्वैतापत्तिः। मायाया अनिर्वचनीयत्वेन वस्तुत्वासंभवादिति।

अद्वैतम्

पूर्वोक्तम् ---→ अचिन्त्यम्

अध्वनःपारम्

अध्वनः पारम्—अध्वनस्संसारगतेः पारं प्रान्तभूमिः, संसारविनिर्मुक्तमित्यर्थः।

अनणु

पूर्वोक्तम् ---→ अदीर्घम्

अनन्तरम्

अनन्तरम्। नास्य जात्यन्तरमन्तराले विद्यत इत्यनन्तरम्।

अनन्तरूपम्

अनन्तरूपम्—न विद्यते अन्तः इयत्ता रूपाणां यस्य सोऽयमनन्तरूपः। देशकाल-वस्तुपरिच्छेदशून्यो वा। अव्यक्तादिविशेषणमात्मानं सदा अवलोकयेत्। तदुक्तं **वासिष्ठे** अर्जुनं प्रति श्रीकृष्णेन—

अनन्तः

अनन्तः त्रिविधपरिच्छेदरहितः।

अनन्यः

अनन्यः---सर्वशरीरेषु एकरूपतया प्रत्यगात्मत्वेन विद्यमान इत्यर्थः।

०८०

अनपरम्

अनपरम्—नास्य अपरं कार्यं विद्यत इति अनपरम्।

अनपानयितव्यम्

अप्राणयितव्यम् अनपानयितव्यम् अव्यानयितव्यम् अनुदानयितव्यम् असमान-यितव्यम् अनेन नामपञ्चकेन प्राणनादिव्यापारविषयत्वप्रतिषेधः ।

अनमामि

पूर्वोक्तम् ---→ अज्वलन्

अनल्पः

अनल्पः—परिपूर्णः ।

अनशनायः

अनशनायः—अशितुं इच्छा अशनाया तद्रहितः अनशनायः ।

अनश्नन्

अनश्नन्—भोजनमकुर्वन्, भोक्तृभोज्ययोः प्रेरयितृत्वात् स्वयं नाश्नाति, किन्तु साक्षित्वेन पश्यतीत्यर्थः ।

अनहम्

पूर्वोक्तम् ---→ अज्वलन्

अनहङ्कर्तव्यम्

पूर्वोक्तम् ---→ अचेतयितव्यम्

अनाकाशम्

अनाकाशं—आकाशभिन्नम् ।

अनात्म्यम्

अनात्म्यम्—अशरीरं।

०९०

अनादरः

अनादरः— असम्भ्रमः; अप्राप्तौ हि संभ्रमःस्यात् अनवाप्तकामस्य, नत्वाप्तकामत्वात् नित्यतृप्तस्य ईश्वरस्य संभ्रमोऽस्ति क्वचिदपीत्यर्थः।

अनादातव्यम्

पूर्वोक्तम् ---→ अगन्तव्यम्

अनादि

पूर्वोक्तम् ---→ अगन्धवत्

अनादिनिधनः

अनादिनिधनः—उत्पत्तिविनाशरहितः। अत एव नित्यः स्वप्रकाशः मानान्तरागम्यश्च।

अनादिमत्

अनादिमत्—आद्यन्तशून्यमात्मतत्वमित्यर्थः।

अनानन्दयितव्यम्

पूर्वोक्तम् ---→ अगन्तव्यम्

अनामयम्

अनामयम्—आध्यात्मिकादितापत्रयरहितं, सुखस्वरूपमित्यर्थः।

अनिच्छः

अनिच्छः—इच्छारहितः । इच्छाराहित्यं च आप्तकामत्वात् । तथा चाधिकारी सर्वेच्छा-
विनिर्मुक्तः परमानन्दरूपं परमात्मानं सर्वदाऽनुसन्दध्यात् । इच्छाया अनर्थहेतुत्वमुक्तं

अनिन्द्रियम्

अनिन्द्रियम्—ज्ञानकर्मेन्द्रियरहितम् ।

अनिरुक्तम्

अनिरुक्तम्---अविशेषम् । विशेषश्च विकारः अन्तःकरणादिः तद्रहितम् ।

१००

अनिर्देश्यम्

अनिर्देश्यम् । इदन्तदितिनिर्देष्टुमशक्यं परस्मै, समस्तोपाधिविनिर्मुक्तत्वात् । उप-
लक्षणमेतत्, मनसापि चिन्तयितुमशक्यम् । अथापि ये निवृत्तैषणाः ते प्रत्यक्षमेवैतन्मन्यन्ते ।

==

=================

अनिलयनम्

अनिलयनम्---निलीयतेऽस्मिन्नितिनिलयनम्माया तद्रहितम् । अनेन शरीरत्रयविलक्षण-
मात्मानं ब्रह्म बुध्वा ब्राह्मणो निर्भयो भवेदिति उक्तं भवति ।

अनीडाख्यः

अनीडाख्यः—नीडं शरीरं ; अशरीराख्यः ।

अनुग्रः

__पूर्वोक्तम् ---→ अज्वलन्__

अनुच्छित्तिधर्मा

अनुच्छित्तिधर्मा—उच्छित्तिरुच्छेदः विनाशः, उच्छित्तिः धर्मोऽस्येति उच्छित्तिधर्मा, न उच्छित्तिधर्मा अनुच्छित्तिधर्मा। न विक्रियालक्षणो नाप्युच्छेदलक्षणो विनाशः अस्यात्मनो विद्यत इत्यर्थः।

अनुज्ञा

अनुज्ञा—अनुज्ञैकरस इत्यर्थः।

अनुज्ञाता

अनुज्ञाता—अनुज्ञां ददाति इत्यनुज्ञाता, सर्वस्य प्रपञ्चस्य अनृतजडरूपस्य स्वात्मन्यध्य-

अनुज्ञैकरसः

अनुज्ञैकरसः---स्वात्मन्यध्यस्तस्य प्रविलापने सति स्वयमेव प्रकाशते, यथा दाह्यं दग्ध्वा-ऽग्निः स्वयमेव वर्तते तद्वत् इत्यर्थः।

अनुदानयितव्यम्

__पूर्वोक्तम् ---→ अनपानयितव्यम्__

अनुभवात्मा

अनुभवात्मा—कालत्रयेऽपि परमार्थतोऽविद्यासंबन्धरहित इत्यर्थः।

११०

अनुभूतिः

अनुभूतिः—स्वयंप्रकाशरूपा अवाङ्मनसगोचरेत्यर्थः।

अनुमन्ता

अनुमन्ता—स्वतस्सत्ताप्रकाशप्रवृत्तिसामर्थ्यरहितानां प्राणबुद्ध्यादीनां स्वात्मन्यध्यस्ततया तत्सर्वमनुजानातीत्यनुमन्ता।

अनृसिंहः

पूर्वोक्तम् ---→ अज्वलन्

अनेकरूपः

अनेकरूपः—चेतनाचेतनात्मकसकलप्रपञ्चरूपः।

अनेजत्

-**अनेजत्**—एजृ कम्पने, कम्पनं चलनं स्वावस्था- प्रच्युतिः, तद्विवर्जितं सर्वदैकरूपमित्यर्थः।

अन्तरतरम्

अन्तरतरम्—बाह्यात् पुत्रमित्रादेः प्राणपिण्डसमुदायः अभ्यन्तरस्सन्निकृष्ट आत्मनः,

अन्तरात्मा

अन्तरात्मा—स्वदेहेन्द्रियमनआद्यधिष्ठाता प्रत्यग्रूपः परमात्मेत्यर्थः। तथा चामृतत्व-काम: निगृहीतसकलकरणग्रामः शमदमादिसाधनसंपन्नः सर्वान्तरं स्वप्रकाशं प्रत्यगात्मानं परिपूर्णब्रह्मात्मना सर्वदा अपरोक्षत्वेन जानीयात्। तस्मात् अभ्यन्तरादन्तरतरम्।

अन्तरिक्षाज्ज्यायान्

अन्तरिक्षाज्ज्यायान्—

अन्तरिक्षादपि व्यापकः ।

अन्तरिक्षादन्तरः

अर्थस्तु पूर्ववत् ।

अन्तरिक्षेतिष्ठन्

अर्थस्तु पूर्ववत् ।

१२०

अन्तर्यामी

अन्तर्यामी—अन्तः प्रविश्य सर्वेषां भूतानां यमयिता ।

अन्नादः

अन्नादः—सर्वभूतस्थस्सर्वान्नानामत्ता ।

अन्वेष्टव्यम्

अन्वेष्टव्यम्—गुर्वाश्रयश्रवणाद्युपायैरन्वेषणीयं आत्मतत्त्वमित्यर्थः ।

अपहतपाप्मा

अपहतपाप्मा—अपहतः विनाशितः पाप्मा धर्माधर्माख्यो यस्य सोऽयमपहतपाप्मा ।

अपाणिपादम्

अपाणिपादम्—पाणिपादोपलक्षितकर्मेन्द्रियशून्यम् ।

अनेन नामषट्केन सर्वेन्द्रियाविषयः सर्वेन्द्रियरहितः परमात्मा नित्यः परिपूर्णः प्रत्यगात्मत्वेनानुसन्धेय इत्युक्तं भवति ।

अपापकाशिनी

अपापकाशिनी—स्मृतिमात्रादघनाशनी पुण्याभिव्यक्तिकरी चिद्रूपा मूर्तिः ।

अपापविद्धम्

अपापविद्धम् धर्माधर्मादिपापसंबन्धरहितम् ।

अपारम्

अपारम्—निरवधिकम् ।

अपिपासः

अपिपासः—पानेच्छारहितः ।

अपूर्वम्

अपूर्वम्—नास्य पूर्वं कारणं विद्यत इति अपूर्वम् ।

अप्रमयम्

अप्रमयम्—अप्रमेयं सर्वैकत्वात् । अन्येन ह्यन्यत् प्रमीयते । इदं त्वेकमेव, अतोऽप्रमेयम् ।

अप्रमेयः

अप्रमेयः—प्रत्यक्षादिप्रमाणागम्यः ।

अप्रवर्ति

अप्रवर्ति—न कुतश्चित् क्वचित् प्रवर्तितुं शीलमस्येति अप्रवर्ति । अनुच्छित्तिधर्मकम् ।
यथा अन्यानि भूतानि परिच्छिन्नानि उच्छित्तिधर्मकाणि न तथा हार्दं ब्रह्मेत्यर्थः ।

अप्राणयितव्यम्

पूर्वोक्तम् ---→ अनपानयितव्यम्

अप्राणः

अप्राणः—अविद्यमानः क्रियाशक्तिभेदवान् चलनात्मको वायुर्यस्मिन्नसावप्राणः ।

अप्सुतिष्ठन्

अप्सु तिष्ठन्—अवधिष्ठानतया तिष्ठन् ।

अबाध्यस्वरूपः

अबाध्यस्वरूपः---सत्यस्वरूप इत्यर्थः ।

अबाह्यम्

अबाह्यम्—तथा बहिरस्य न विद्यत इति अबाह्यम् ।

अबोद्धव्यम्

पूर्वोक्तम् ---→ अचेतयितव्यम्

अभद्रः

पूर्वोक्तम् ---→   अज्वलन्

अभयम्

अभयम्—भयरहितं नित्यमुक्तत्वात् ।

अभयं रूपम्

अभयं रूपम्—भयं हि नाम अविद्याकार्यम्; अविद्यया हि भयं मन्यते । तथा च कार्यद्वारेण कारणप्रतिषेधोऽयम्; अविद्याऽतीतं स्वरूपमित्यर्थः ।

अभातम्

अभातम्—अविषयत्वेन स्वयमेव प्रकाशरूपम् ।

अभिन्नरूपः

अभिन्नरूपः—सर्वात्मकः ।

अभिन्नः

अभिन्नः—विजातीयसाक्ष्यसद्भावरहितः परमार्थत इत्यर्थः ।

अभिविमानः

अभिविमानः—प्रत्यगात्मतया सर्वैः प्राणिभिरभिविमीयते अहमिति ज्ञायत इत्यभिविमानः । अभिगतो वा अयं सर्वप्रत्यगात्मत्वात् विमानश्च मानवियोगादित्यभिविमानः । अभिविमिमीते वा सर्वं जगत् कारणत्वादित्यभिविमानः ।

अभीषणः

पूर्वोक्तम् ---→ अज्वलन्

अमतः

अमतः—मनस्सङ्कल्पविषयतामनापन्नः। दृष्टश्रुते एव हि सर्वस्सङ्कल्पयति। अयं तु अदृष्टत्वादश्रुतत्वाच्च अमतः।

अमनस्कम्

अमनस्कम्—मनोरहितम्।

अमनाः

अमनाः— ज्ञानशक्तिभेदवत् सङ्कल्पाद्यात्मकं मनोऽविद्यमानं यस्मिन् सोयमनाः। **अप्राणोह्यमनाः** इति प्राणादिवायुभेदाः कर्मेन्द्रियाणि तद्विषयाश्च तथा बुद्धिमनसी बुद्धीन्द्रियाणि तद्विषयाश्च प्रतिषिद्धा वेदितव्याः। अत्र बाह्येन्द्रियाणामुपादानं विना मनस उपादानं श्रुत्यां मनसः प्राधान्यात्; तन्निरोधे कृते सर्वदुःखविनिर्मुक्ततया आत्मस्वरूपाभि-

अमन्तव्यम्

पूर्वोक्तम् ---→ अचेतयितव्यम्

अमरः

अमरः—नम्रियत इत्यमरः। उत्पत्त्यादिविकाररहितोऽपि। तथा च उत्पत्त्यादिविनिर्मुक्तमात्मानं सदा अहमित्यनुसन्दध्यात्।

अमहान्

पूर्वोक्तम् ---→ अज्वलन्

अमात्रः

अमात्रः—मात्रा अकारोकारमकाररूपास्समष्टिव्यष्ट्यात्मकविश्वतैजसप्राज्ञविराड्हिरण्यगर्भेश्वरात्मकाः यत्र तुरीये न सन्ति सोऽमात्रः। अपरिच्छिन्नस्सर्वव्यवहारातीत आत्मेत्यर्थः।

अमायम्

अमायम्—सत्वादिगुणसामान्यरूपमायावर्जितम् ।

अमुखम्

अमुखम्—मुखं द्वारं तद्रहितम् ।

अनेन अस्थूलत्वादिविशेषणजालेन देहेन्द्रियादिसर्वोपाधिविनिर्मुक्तं प्रत्यभिन्नं ब्रह्म सर्वदा अनुसन्धेयमित्युक्तं भवति ।

अमूढः

अमूढः—कर्तृत्वभोक्तृत्वरहितत्वात् स्वमहिमस्थितत्वाच्च स्वयंप्रकाश इत्यर्थः ।

अमूर्तः

अमूर्तः—सर्वमूर्तिवर्जितः ।

अमृतत्वस्येशानः

अमृतत्वस्येशानः—अमरणधर्मत्वस्य कैवल्यस्य ईशानः, मोक्षप्रद इत्यर्थः ।

अमृतमयः

अमृतमयः—अमरणधर्मकः ।

१६०

अमृतम्

अमृतम्—अविनाशिस्वभावं सच्चिदानन्दरूपं ब्रह्म, तद्व्यतिरिक्तं सर्वमनृतं जडदुःखात्मकं तस्मिन्नेव समाश्रितम् । तस्मात् सर्वप्रपञ्चविनिर्मुक्तं ब्रह्मैवाहमित्यनु-सन्दध्यात् ।

अमृतस्य नाभिः

अमृतस्य नाभिः---अमृतत्वस्य मोक्षस्य नाभिः कारणम्।

अमृतस्य परस्सेतुः

अमृतस्य परस्सेतुः---अमृतस्य अमृतत्वस्य मोक्षस्य प्राप्तये परः उत्कृष्टः सेतुरिव सेतुः संसारमहोदधेरुत्तरणोपायत्वात्।

अमृताक्षरम्

अमृताक्षरम्---अमृतं च तदक्षरं च अमृताक्षरं, नित्यस्वरूपमित्यर्थः। **क्षरं प्रधानममृताक्षरं हरः** इति श्रुतिः।

अमृत्युमृत्युः

पूर्वोक्तम् ---> अज्वलन्

अमोहः

अमोहः---मोहरहितः।

अम्बिकापतिः

अंबिकापतिः—अम्बिका संविद्रूपा पराशक्तिः, तस्याः पतिः तदभिन्नः परशिवः। ननु शक्तेर्जडरूपत्वात् कथं संविद्रूपत्वमिति चेत्—उच्यते—द्विविधा हि शक्तिः। चिच्छक्तिर्जडशक्तिश्चेति। तत्र चिच्छक्तिः परशिवादभिन्नैव। तयोः भेदस्तु भ्रान्तः। यथा जीवपरयोः। जडशक्तिस्तु माया स्वाश्रयव्यामोहकारिणी। सा च चिद्रूपे परमात्मनि स्वरूपेणाध्यस्ता सत्वासत्वाभ्यामनिर्वचनीया सम्यग्ज्ञानेन निवर्त्या च। तथाहि— नियतकालपरिपाकानां हि प्राणिकर्मणां मध्ये परिपक्वानामुपभोगेन प्रक्षयात् इतरेषाञ्चापरिपाकात् भोगाभावेन तदर्थायाः सृष्टेरनुपयोगात् प्राकृत प्रलये ग्रस्तव्यस्तसमस्तप्रपञ्चा माया स्वप्रतिष्ठे निष्कले परशिवे विना यावदवशिष्टकर्मपरिपाकं वर्तते।

अथवा अम्बिकाशब्देन ब्रह्माकारमनोवृत्त्यवच्छिन्ना सर्वप्राणिनां सुखकारिणी संसारनिवर्तिका संविदुच्यते। तस्याः पतिः प्रदाता परशिवः। ब्रह्मविद्यायाः परमेश्वरप्रसादाधीनत्वात्।

ननु ब्रह्मविद्यायाः पराशक्तिप्रसादलभ्यत्वमवगम्यते

अथवा अम्बिकाशब्देन भक्तानुग्रहार्थं स्वीकृतलीलाविग्रहा परमकारुणिका लोकोत्तरसौन्दर्यशालिनी परमशिवाविनाभूता गौरी देवी प्रतिपाद्यते।

तस्याः पतिः प्रियः परमेश्वरः। स एव सर्वैर्मुमुक्षुभिः हृदयादिस्थानेषु अम्बिकया सह अहंग्रहादिरूपेण ध्यातव्यः नमस्कार्यश्च।

अयोनिः

अयोनिः—परमार्थतः सर्वप्रपञ्चकल्पकत्वरहितः।

अरजस्कम्

असत्वम् अरजस्कम् अतमस्कम्—नामत्रयेण सत्वादिगुणत्रयनिषेधः।

अरसम्

पूर्वोक्तम् ---→ अगन्धवत्

अरूपम्

पूर्वोक्तम् ---→ अगन्धवत्

अर्चिमत्

अर्चिमत्—दीप्तिमत् तद्दीप्त्या ह्यादित्यादिर्दीप्यते इति ।

अलक्षणम्

पूर्वोक्तम् ---→ अचिन्त्यम्

अलिङ्गः

अलिङ्गः—लिङ्ग्यते गम्यते येन तल्लिङ्गं बुद्ध्यादि तद्रहितः। स्वस्य स्वप्रकाशरूपत्वेन सर्वस्य जडवर्गस्य गमकत्वात् न स्वयं बुद्ध्यादिजडवर्गेण गम्यः।

ननु प्राणादीनां परमात्मनो लिङ्गत्वेन प्रसिद्धत्वात् कथमलिङ्गं इत्युच्यते इति चेत्— सत्यम्। व्यवहारदृष्ट्या तेषां लिङ्गत्वं न तत्वदृष्ट्या।

तस्मात् परमार्थदृष्ट्या स्वयंप्रकाशस्य ब्रह्मणो गमकान्तरनिरपेक्षत्वात् स्वयमेव सर्व-गमकत्वाच्च अलिङ्गत्वमुपपन्नम्।

अलेपः

अलेपः—अविद्यातत्कार्यलेपरहितः।

अलोहितम्

अलोहितं—लोहितादिसत्वगुणवर्जितम्

अवक्तव्यम्

पूर्वोक्तम् ---→ अगन्तव्यम्

अवक्रचेताः

अवक्रचेताः ।। नवक्रमवक्रमकुटिलं नित्यमादित्यप्रकाशवत् सर्वदावस्थितमेकरूपं चेतो विज्ञानं अस्येत्यवक्रचेताः, तस्यावक्रचेतसो ब्रह्मणः यत् पारमार्थिकं रूपं तद्रूपं सर्वैषणाविनिर्मुक्तः सन् सम्यग्विज्ञानपूर्वकमनुष्ठाय ध्यात्वा न शोचति। तद्विज्ञानादभयप्राप्तिः शोकावसराभावादित्यर्थः ।

अवर्णम्

अवर्णम्—वर्ण्यन्ते इति वर्णाः द्रव्यधर्माः स्थूलत्वादयश्शुक्लत्वादयो वा, तद्रहितं ब्राह्मणादिवर्णरहितं वा ।

अवस्थितः

अवस्थितः—नश्यत्स्वपि शरीरेषु स्वयं अनश्वरतया स्थितः । नश्यत्स्वपि घटकरकादिषु यथ आकाशः परिपूर्णतया अचलः सन् तिष्ठति एवमात्मापीत्यर्थः।

१९०

अवाक्

अवाक्—वागिन्द्रियमिन्नम् ।

अवाकी

अवाकी—उच्यते अनयेति वाक् वागेव वाकः; स यस्य विद्यते स वाकी। न वाकी अवाकी। वाक्प्रतिषेधश्चात्रोपलक्षणार्थः। सर्वेन्द्रियरहितः इत्यर्थः ।

अवायुः

अवायुः—वायुभिन्नम् ।

अविकल्परूपम्

अविकल्परूपं—वाच्यवाचकभेदरहितम् ।

अविकल्पः

अविकल्पः—विकल्परहितः, अवाङ्मनोगोचरः, मनोवागविषय इत्यर्थः ।

अविक्रियः

अविक्रियः—सर्वसाक्षित्वात् विकाररहितः ।

अविकारः

अविकारः—सर्वविकारसाक्षी ।

अविकारी

अविकारी—षड्भावविकाररहितः इत्यर्थः ।

अविज्ञातः

अविज्ञातः—निश्चयगोचरतामनापन्नः रूपादिवत् सुखादिवच्च ।

अविद्याकार्यहीनः

अविद्याकार्यहीनः—नित्यशुद्धबुद्धमुक्तस्वभाव इत्यर्थः ।

२००

अविनाशी

अविनाशी—विनशनं शीलमस्येति विनाशी, न विनाशी अविनाशी। विनाशशब्देन विक्रिया [उच्यते] अविक्रिय आत्मेत्यर्थः ।

अविमुक्तः

अविमुक्तः—विरुद्धत्वेन मुक्ताः विमुक्ताः पशवः तेभ्यो व्यतिरिक्तः अविमुक्तः पशुपतिः ।

अविमुक्ते प्रतिष्ठितः

अविमुक्ते प्रतिष्ठितः—अविमुक्ते अविद्योपाधिकल्पितावच्छेदे जीवात्मनि; स खल्वविमुक्तः ; तस्मिन् प्रतिष्ठितः ; परमात्मतादात्म्यात् । अविद्याकल्पितत्वेन भेदमाश्रित्य आधाराधेयभावः ।

अविशेषः

अविशेषः—साक्षित्वादिसर्वविशेषरहितः ।

अविषयम्

अविषयम्—विषयसामान्यरहितम् ।

अविषयज्ञानः

अविषयज्ञानः—यद्यप्ययं सर्वज्ञः परमात्मा तथापि सुषुप्ते स्वव्यतिरिक्तविषयसंबन्धराहित्यादविषयज्ञानः ।

अविष्णुः

पूर्वोक्तम् ---→ अज्वलन्

अविसर्जयितव्यम्

पूर्वोक्तम् ---→ अगन्तव्यम्

अवीरः

पूर्वोक्तम् ---→ अज्वलन्

अव्यक्तम्

अव्यक्तम्—शब्दाद्यशेषविशेषशून्यम् ।

२१०

अव्यक्तात्परः

अव्यक्तात् परः—अव्यक्तं सर्वजगतोऽपि बीजभूतं अव्याकृतनामरूपसतत्त्वं सर्वकार्यकारणशक्तिसमाहाररूपं अव्याकृताकाशादिनामवाच्यं परमात्मनि ओतप्रोतभावेन समाश्रितं वटकणिकायामिव वटवृक्षशक्तिः, तस्मादव्यक्तात् परः सूक्ष्मतरः सर्वकारणत्वात् । प्रत्यगात्मत्वाच्च महांश्च । स एव पुरुषः पूरणात् ।

अव्यग्रः

अव्यग्रः—सृष्टिस्थितिसंहारकार्यवैय्यग्र्यरहितः ।

अव्यपदेश्यम्

पूर्वोक्तम् ---→ अचिन्त्यम्

अव्यभिचारी

अव्यभिचारी—अवस्थात्रयेऽप्यनुस्यूतः । तथा च जाग्रदाद्यवस्थात्रयक्षीणं तुरीयमात्मानं भावयेदिति भावः ।

अव्ययम्

पूर्वोक्तम् ---→ अगन्धवत्

अव्यवहार्यम्

पूर्वोक्तम् ---→ अचिन्त्यम्

अव्यानयितव्यम्

पूर्वोक्तम् ---→ अनपानयितव्यम्

अव्रणम्

अव्रणम्—अक्षतम् ।

अशब्दम्

पूर्वोक्तम् ---→ अगन्धवत्

अशरीरः

अशरीरः—शरीरसंबन्धरहितः ।

२२०

अशीर्यः

अशीर्यः—यद्धि मूर्तं संहतं शरीरादि तत् शीर्यते ; अयन्तु तद्विपरीतः, अतोऽशीर्यः ।

अशुभक्षयकर्ता

अशुभक्षयकर्ता—सवासनक्लेशनाशनकर्ता ।

अश्रृङ्गम्

अश्रृङ्गम्—अमात्रं निरवयवमिति यावत् ।

अशोकः

अशोकः—शोकरहितः ।

अश्रुतः

अश्रुतः—श्रोत्रगोचरतामनापन्नः कस्यचित् ।

अश्रोत्रम्

अश्रोत्रम्—श्रोत्रेन्द्रियरहितम् ।

असङ्गम्

असङ्गम्—संबन्धरहितं, निर्लेपमित्यर्थः ।

असत्

असत्—व्याकृतनामरूपविशेषविपरीतमव्याकृतं ब्रह्मोच्यते, न पुनरत्यन्तमेवासत्, नह्यसतस्सज्जन्मास्ति

असत्वम्

असत्वम् अरजस्कम् अतमस्कम्—नामत्रयेण सत्वादिगुणत्रयनिषेधः ।

असमानयितव्यम्

पूर्वोक्तम् ---→ अनपानयितव्यम्

२३०

असर्वतोमुखः

पूर्वोक्तम् ---→ अज्वलन्

असितः

असितः—अबद्धः । यद्धि मूर्तं तत् बध्यते ; अयन्तु तद्विपरीतः ; अतोऽसितः ।

असिद्धम्

असिद्धम्—स्वयं सच्चिदानन्दरूपत्वेन सर्वप्रमाणसाधकत्वात् प्रमाणान्तरसिद्धं न भवति,

असुखदुःखः

असुखदुःखः—सुखदुःखादिधर्मरहितः इत्यर्थः ।

असुप्तः

असुप्तः—प्रकाशस्वरूपः अलुप्तदृगादिशक्तिः स्वाभाव्यात् ।

असुषुप्तः

असुषुप्तः---सुषुप्त्यवस्थारहितः, अज्ञानरहित इत्यर्थः ।

अस्थूलम्

अस्थूलम्—स्थूलात् अन्यत् ।

अस्नाविरम्

अस्नाविरम्—स्नावाः सिराः अस्मिन् विद्यन्ते इति स्नाविरं न स्नाविरमस्नाविरम् अव्रणमस्नाविरमित्याभ्यां स्थूलशरीरप्रतिषेधः । तथा च स्थूलसूक्ष्मशरीरवर्जित आत्मेत्यर्थः । एवं च अनात्मनि देहे आत्मबुद्धिः कदापि न कार्या ।

अस्नेहम्

अस्नेहम्—अपां गुणः स्नेहः तस्मात् भिन्नम् ।

अस्पर्शम्

पूर्वोक्तम् ---→ अगन्धवत्

२४०

अस्वप्नः

अस्वप्नः—स्वप्नावस्थारहितः, भ्रान्तिज्ञानरहितः ।

अहम्

अहं—आत्मेत्यर्थः ।

अह्रस्वम्

पूर्वोक्तम् ---→ अदीर्घम्

अक्षय्यः

अक्षय्यः—क्षयरहितः षड्भावविकाररहित इत्यर्थः ।

अक्षरः

अक्षरः—नाशरहितः ।

२४५

अक्षरात्परतःपरः

अक्षरात् परतः परः—

अक्षरात् नामरूपबीजोपाधिलक्षितस्वरूपात् सर्वकार्यकरणबीजत्वेन उपलक्ष्यमाणत्वात् परं तत्त्वमुपाधिलक्षणमव्याकृताख्यमक्षरं सर्वविकारेभ्यः; तस्मात् अक्षरात् परः निरुपाधिकः पुरुष इत्यर्थः । **'दिव्यो ह्यमूर्त'** इत्यस्मिन् मन्त्रे शारीरप्रधानाभ्यां भिन्नः परमेश्वर एव प्रतिपादित इति

====================================

=============

आकाशः

आकाशः—आ समन्तात् काशते प्रकाशते इत्याकाशः परिपूर्णप्रकाशरूप इत्यर्थः।

आकाशात्परः

आकाशात् परः---आकाशादव्याकृताख्यात् परः व्यतिरिक्तः सूक्ष्मो व्यापी वा।

आकाशात्मा

आकाशात्मा—आकाश इव आत्मा स्वरूपं यस्य स आकाशात्मा। सर्वगतत्वं सूक्ष्मत्वं रूपादिरहितत्वञ्च आकाशतुल्यतेश्वरस्य। **सत्यसंकल्प आकाशात्मा** इति श्रुतिः।

आकाशादन्तरः

—पूर्ववत्।

२५०

आकाशेतिष्ठन्

—पूर्ववत्।

आततम्

आततम्—आसमन्तात् ततं व्याप्तं परिपूर्णमित्यर्थः।

आत्मकामम्

आप्तकामम् आत्मकामम्—यस्मात् समस्तमेतद्रूपं तस्मादाप्ताः कामा यस्मिन् रूपे तदिदमाप्तकामम्, यस्य ह्यन्यत्वेन प्रविभक्तः कामो भवति तदनाप्तकामं भवति यथा जागरितावस्थायां देवदत्तादिरूपं नत्विदं तथा कुतश्चित्प्रविभज्यते अत आप्तकामं भवति। किमन्यस्माद्वस्त्वन्तरात् न प्रविभज्यते आहोस्विदात्मैव तद्वस्त्वन्तरम्। अत्राह। नान्यदस्त्यात्मनः। कुतः। यतः आत्मकामम् आत्मैव कामोऽस्मिन् रूपे, अन्यत्र विभक्त इव अन्यत्वेन काम्यमानः यथा जाग्रत्स्वप्नयोः

आत्मज्योतिः

आत्मज्योतिः—आत्मैवज्योतिरात्मज्योतिः, स्वयम्प्रकाशरूपम्।

आत्मतत्वम्

आत्मतत्त्वम्—आत्मनः वास्तवं सच्चिदानन्दरूपमित्यर्थः।

२५५

आत्मनितिष्ठन्

आत्मनि तिष्ठन्—आत्मनि जीवात्मनि प्रतिबिंबभूते बिंबत्वेन वर्तमानः।

आत्मनोऽन्तरः

आत्मनोऽन्तरः—जीवस्य नियन्ता।

आत्मबुद्धि [प्रसादः] प्रकाशः

आत्मबुद्धि[प्रसादः]प्रकाशः—आत्मनि या बुद्धिस्तस्याः प्रसादकरः। प्रसन्ने हि परमेश्वरे बुद्धिरपि तद्विषया प्रमा निष्प्रपञ्चाकारब्रह्मात्मनाऽवतिष्ठते। अथवा आत्मैव बुद्धिरात्मबुद्धिः सैव प्रकाशोऽस्येत्यात्मबुद्धिप्रकाशः।

आत्मयोनिः

आत्मयोनिः—आत्मा चासौ योनिश्च आत्मयोनिः सर्वस्यात्मा सर्वस्य योनिः।

आत्मविद्यातपोमूलम्

आत्मविद्यातपोमूलम्—आत्मनः स्वयंप्रकाशचिदानन्दरूपस्य विद्या उपासनं श्रवणमननादि तज्जन्यसाक्षात्कारश्च, तपः आत्मज्ञानसाधनं स्वस्ववर्णाश्रमोचिताचाररूपं तयोः प्रवृत्तिनिवृत्त्यात्मकयोः विद्यातपसोः, उपलक्षणमेतत्, निखिलस्य जगतो मूलं उपादानकारणम्।

२६०

आत्मस्थः

आत्मस्थः—स्वशरीरहृदयाकाशे बुद्धौ चैतन्याकारेण अभिव्यक्तः। नहि शरीराधारत्वमात्मनस्संभवति, आकाशवदमूर्तत्वात्। आदर्शस्थं मुखं इति यद्वत्। श्रुतिस्तु—

आत्मसंस्थम्

आत्मसंस्थम्—आत्मनि स्वे महिम्नि स्थितम्।

आत्मा

आत्मा—सर्वव्यापकः सर्वोपादानभूतः सर्वात्मकः सर्वविषयावभासकः सर्वोपसंहारकश्च। तथा च स्मर्यते—

आत्मेश्वरः

आत्मेश्वरः—आत्माचानादीश्वरश्च आत्मेश्वरः, प्रत्यगभिन्नः परमात्मेत्यर्थः।

आदित्यवर्णः

आदित्यवर्णः—प्रकाशरूपः।

२६५

आदित्यादन्तरः

आदित्यादन्तरः—आदित्यदेवतान्तर्यामितया वर्तत इत्यर्थः।

आदित्येतिष्ठन्

आदित्ये तिष्ठन्—आदित्याधिष्ठानतया वर्तमान इत्यर्थः।

आदिमध्यान्तविहीनम्

आदिमध्यान्तविहीनम्—उत्पत्तिपरिच्छेदविनाशवर्जितः

आदिः

आदिः—कारणम्।

आदेशः

आदेशः—आदिश्यत इत्यादेशः, केवलं शास्त्राचार्योपदेशादेव गम्यते, न तु स्वबुद्ध्या ऊहितुं शक्य आत्मेत्यर्थः। तदुक्तं **सूतसंहितायाम्**—

२७०

आधारम्

आधारम्—रज्जुरिव सर्पधारादेः सकलस्य विश्वस्याधारभूतम्।

आनखाग्रेभ्यः प्रविष्टः

आनखाग्रेभ्यः प्रविष्टः—नखाग्रमर्यादं ह्यात्मनश्चैतन्यमुपलभ्यते। नखाग्रव्यतिरिक्ते सर्वशरीरे प्रविष्ट इत्यर्थः।

आनन्दचिद्घनम्

आनन्दचिद्घनम्—कस्यचिदपि द्वितीयस्यासत्त्वे सुखानुभवस्याप्यसंभवात् न पुरुषार्थं तदिति चेन्नेत्याह-आनन्दचिद्घनमिति। स्वयमेवानन्दानुभवात्मकमेकरसश्चेत्यर्थः।

आनन्दघनः

आनन्दघनः—निबिडानन्दस्वरूपः, परमप्रेमास्पदत्वात्।

आनन्दरूपम्

आनन्दरूपम्—सर्वानर्थदु:खायासहीनं सुखरूपम्।

२७५

आनन्दः

आनन्दः—परमप्रेमालम्बनत्वेन उपलक्षित:, सर्वदु:खविनिर्मुक्तसुखस्वरूप:।

आनन्दामृतरूपः

आनन्दामृतरूपः---नाशरहितसुखैकतानमित्यर्थ: ।

आन्तरः

आन्तरः—ओतादप्यान्तर:, आत्मस्वरूपमित्यर्थ:।

आप्तकामम्

पूर्वोक्तम्------->आत्मकामम्

आप्ततमः

आप्ततमः—व्याप्ततम:—परिपूर्ण इत्यर्थ:।

२८०

आप्ततमार्थः

आप्ततमार्थः—व्यापकतम इति यावत्।

आप्रणखात् सर्व एव सुवर्णः

आयुः

आयुः—आयुस्स्वरूपं ब्रह्म, कालानवच्छिन्नत्वात्। अतोऽन्यन्म्रियते, इदन्तु आदित्यादिज्योतिषामवभासकं न म्रियते, अत: आयुष्कामेन आयुर्गुणविशिष्टं ब्रह्मोपास्यमित्यर्थ:।

२८३

आसीनः

आसीनः—अवस्थितः अचल इत्यर्थः। **आसीनो दूरं व्रजती**ति श्रुतिः।

==
================

इदन्द्रः

इदन्द्रः—आत्मेत्यर्थः। कथम्? आत्मैव आकाशादिद्वारा शरीरं सृष्ट्वा तत्र प्रविश्य सुखदुःखादिकं संसारमनुभूय आचार्योपदेशानन्तरं परिपूर्णमेव स्वात्मनः स्वरूपमिदमित्यपरोक्षरूपेण दर्शयति, दृष्टवानस्मीत्येवंप्रकारेण स्वात्मानमपरोक्षरूपेणानुभूतवान्, तस्मादिदन्द्रो नाम परमात्मा। तर्हि कथमिन्द्र इत्युच्यते? परोक्षाभिधानेनेति गृहाण। इन्द्रः परमेश्वरः। तदुक्तं **विद्याप्रकाशे**—

इन्धः

इन्धः—दीप्तिगुणविशिष्टः परमात्मा।

ईट्

ईट्—ईष्ट इति ईट् सर्वनियन्ता।

ईड्यः

ईड्यः—स्तुत्यः।

ईशः

ईशः—जीवविलक्षणोऽसंसारी, अशनायापिपासाशोकमोहजरामृत्युव्यतीतः सर्वस्य जगत ईश्वरः।

ईशनी यः

ईशनी यः—नियमनशक्तिमान् ।

२९०

ईशसंस्थः

ईशसंस्थः—ईशे स्वामित्वे सर्वनियन्तृत्वे संस्थितिः अवस्थान यस्य सः ईशसंस्थः ।

ईशानः

ईशानः—स्पष्टम्

ईश्वरग्रासः

ईश्वरग्रासः—ईश्वरमपि कारणात्मानं अखण्डाकारवृत्त्यारूढस्सन ग्रसतीति ईश्वरग्रासः अनेन ब्रह्मणो निरुपाधिकं स्वरूपमुक्तं भवति ।

२९३

ईश्वराणां परमो महेश्वरः

ईश्वराणां परमो महेश्वरः—ईश्वराणां विष्णुवैवस्वतादीनां परमो महेश्वरः उत्कृष्टनियन्ता ।

उकारः

उकारः—उत्कृष्टतमार्थः—उत्कृष्टतमश्चासौ अर्थश्च उत्कृष्टतमार्थः । ननु उकारस्य वर्णरूपत्वात् कथमुत्कृष्टतमार्थत्वमिति चेत्—सत्यं—वाच्यवाचकयोरभेदात् एवकाराच्च । तथा

उग्रः

उग्रः—सर्वसंहारसमर्थः-अखण्डाकारवृत्त्यारूढस्सन् अविद्यातत्कार्यनिवर्तकः ।

उत्

उत्—उदिति परमेश्वरस्य गौणं नाम। सर्वेभ्यः पाप्मभ्यः सर्वदुरितेभ्यः उदितः अस्पृष्टत्वात्।

उत्कर्ता

उदुत्कृष्टः उदुत्पादकः उत्प्रवेष्टा उत्स्थापयिता उदुद्रष्टा उत्कर्ता उदुत्पथवारकः उदुद्ग्रासः उदुद्भ्रान्तः उदुत्तीर्णविकृतिः--पूर्वत्र अकारस्य शुद्धप्रत्यगर्थतामभिधाय उच्चारणसमये किञ्चिद्दीर्घतया मात्राद्वयविशिष्टस्य उकारस्य ब्रह्मार्थत्वे युक्तिमाह-**उदुत्कृष्टत्वा**दित्यादित्यादिना। उत्कृष्टत्वधर्मादुद्गतत्वे सति उत्कृष्टत्वमुदुत्कृष्टत्वम्। उदुत्पादकत्वादिकमप्येवमेव द्रष्टव्यम्। उत्कृष्टत्वं सर्वसंसारधर्मवर्जितत्वं ब्रह्मणस्सर्वज्ञत्वादिगुणविशिष्टत्वञ्च, उत्पादकत्वं सर्वस्रष्टृत्वं ब्रह्मरूपेण, सृष्टे जगति जीवरूपेण प्रवेष्टृत्वम्, तन्नियन्तृविष्णुरूपेण स्थापयितृत्वम्, प्रविष्टस्य द्रष्टृत्वम् कर्तृत्वञ्च बुद्धिप्राणोपाधितया, उत्पथवारकत्वं नियन्तृत्वमीश्वररूपेण, उद्ग्रासत्वं सर्वसंहर्तृत्वं रुद्ररूपेण, उद्भ्रान्तत्वं व्याप्तत्वं कारणात्मना, उत्तीर्णविकृतित्वं साक्ष्यात्मना। अयमर्थः—ब्रह्म तावदुत्कृष्टत्वादिगुणविशिष्टम्। तथाविधब्रह्मवाचकाश्चैते शब्दा उत्कृष्टादयः। तेषामादिभूतश्चायं प्रणवस्य उकारो द्विमात्रः। तस्मादुत्कृष्टादिशब्दरूप एव सः। तस्मादुत्कृष्टत्वादिगुणविशिष्टब्रह्मवाचकोऽसाविति।

उत्कृष्टतमः

उत्कृष्टतमः—स्पष्टम्।

उत्कृष्टः

उत्कृष्टः— स्पष्टम्।

३००

उत्तमपुरुषः

उत्तमपुरुषः। उत्तमश्चासौ पुरुषश्च उत्तमपुरुषः अक्षिस्वप्नसुषुप्तपुरुषापेक्षया।

उत्प्रवेष्टा

पूर्वोक्तम्---→उत्कर्ता

उत्स्थापयिता

<u>पूर्वोक्तम्---→उत्कर्ता</u>

उदुत्कृष्टः

<u>पूर्वोक्तम्---→उत्कर्ता</u>

उदुद्भासः

उदुत्तीर्णविकृतिः

<u>पूर्वोक्तम्---→उत्कर्ता</u>

उद्भ्रष्टा

<u>पूर्वोक्तम्---→उत्कर्ता</u>

उदुत्पथवारकः

<u>पूर्वोक्तम्---→उत्कर्ता</u>

उदुत्पादकः

<u>पूर्वोक्तम्---→उत्कर्ता</u>

उदुद्भ्रान्तः

<u>पूर्वोक्तम्---→उत्कर्ता</u>

३१०

उद्गीथः

<u>**उद्गीथः**</u>—उद्गीथ इति परमेश्वरस्य परोक्षं नाम।

उद्गीतम्

उद्गीतम्—

कार्यकारणलक्षणात् प्रपञ्चात् उपरि गीतं वेदान्तैः

उपद्रष्टा

उपद्रष्टा—कर्तृसमीपस्थस्सन् कर्तृन् पश्यति न स्वयं कर्त्रेत्युपद्रष्टा ; अतो न कर्तृत्वादि संसारधर्मवत्त्वमात्मन इत्यर्थः ।

उपनिषत्पदम्

उपनिषत्पदम्—सदेरुपनिपूर्वस्य संसारविनाशार्थस्य ब्रह्मगत्यर्थस्य अविद्यादिबन्ध-शिथिलीकरणार्थस्य च ब्रह्मज्ञानमन्तरेणासंभवात् उपनिषत् ब्रह्मज्ञानं तस्य पदं विषयः । ब्रह्म-ज्ञानैकबोध्यमित्यर्थः ।

उपलब्धा

उपलब्धा—सर्वसाक्षीत्यर्थः

उपासितव्यम्

उपासितव्यम्—श्रवणमनननिदिध्यासनैस्साक्षात्कर्तव्यम् ; अथ वा निर्विशेषस्वरूपप्रति-पत्त्यर्थं सगुणब्रह्मरूपेण वा उपासनीयम् ।

उपसंहर्ता

उपसंहर्ता—प्रलयकाले नामरूपात्मकप्रपंचोपसंहारकर्ता, अथवा, अखण्डाकारवृत्त्या-रूढस्सन् स्वेतरं कृत्स्नप्रपञ्चमुपसंहरतीति ।

उमापतिः

उमापतिः—उमाशब्देन चिच्छक्तिः ब्रह्मविद्या ब्रह्मविद्याप्रदात्री भवानी वा तस्याः पतिः रमेश्वरः । यदत्र वक्तव्यं तत् सर्वं अम्बिकापतिनामव्याख्यानावसरे प्रपञ्चितमिति तत्रैव द्रष्टव्यम् ।

उमासहायः

उमासहायः—उमा चिच्छक्तिः ब्रह्मविद्या भवानी वा सहायो यस्य स उमासहायः ।

ऊर्ध्वरेतम्

ऊर्ध्वरेतम्—सदा सन्दीप्ततपस्कं यद्विकारेभ्य ऊर्ध्ववर्ती। छान्दसस्सकारलोपः। निर्विकारमित्यर्थः।

३२०

ऋतम्

ऋतम्—अवितथस्वभावम्।

३२१

ऋषिसङ्घजुष्टम्

ऋषिसंघजुष्टम्—ऋषिसंघैर्वामदेवादिभिः जुष्टं सेवितं-साक्षात्कृतमिति यावत्।

एकम्

एकम्—अद्वितीयम्।

एकनेमिः

एकनेमिः—योनिः कारणमव्याकृतमाकाशं परमव्योम माया प्रकृतिश्शक्तिस्तमो अविद्या छाया अज्ञानमनृतमव्यक्तमित्येवमादिशब्दैरभिलप्यमाना एका कारणावस्था नेमिरिव आधारा

एकरसम्

एकरसम्—चैतन्यैकस्वरूपम्।

एकर्षिः

एकर्षिः। एकश्चासावृषिश्चेत्येकर्षिः—स्वयं प्रकाशमानः।

एकलः

एकलः—अद्वितीयः, अनवयवो वा ।

एकहंसः

एकहंसः । एकस्सन् जाग्रत्स्वप्नयोः इहलोकपरलोकान् गच्छतीति एकहंसः ।

एकात्मप्रत्ययसारः

एकात्मप्रत्ययसारः—जाग्रदादिस्थानेषुएकएवायमात्मेत्यव्यभिचारी यः प्रत्ययः तेनानुसरणीयः । अथवा, एकात्मप्रत्ययः सारः यस्य तुरीयस्याधिगमे स तुरीय एकात्मप्रत्ययसारः ।

३२९

एको रुद्रः

एको रुद्रः—भेदरहितस्सन् सर्वदुःखादिनाशकः ।

३३०

ओङ्कारः

ओङ्कारः—

अत्र ओंकारे नामान्तरापेक्षया विशेषो दृश्यते श्रुतिस्मृतीतिहासपुराणेषु ।

ओङ्कारग्रविद्योतः

ओंकाराग्रविद्योतः—ओंकाराग्रे तत्साक्षितया विद्योतमानः-प्रकाशमान इत्यर्थः ।

ओतः

ओतः—व्यापकः ।

औपनिषदः

औपनिषदः—उपनिषदेकसमधिगम्यः ।

इति श्रीमत्परमहंसपरिव्राजकाचार्याभिनवनारायणेन्द्रसरस्वतीपूज्यपादशिष्य - श्रीमत्परमशिवेन्द्रसरस्वतीविरचिते वेदान्तनामरत्नसहस्रव्याख्याने

स्वरूपानुसन्धानाख्ये
प्रथमः खण्डः

ओम्

द्वितीयः खण्डः

कम्

कम्—सुखरूपम् ।

कर्ता

कर्ता—कारणभूतः । नन्वसंगोदासीनस्य आत्मनः अकर्तृत्वात् कथं कर्तृत्वम्? औपाधिकमिति चेत् तर्हि दुःखित्वप्रसंगः इति । महाकर्तृत्वस्य विवक्षितत्वात् ।

कर्माध्यक्षः

कर्माध्यक्षः—सर्वप्राणिकृतविचित्रकर्माधिष्ठाता ।

करणाधिपाधिपः

करणाधिपाधिपः—करणाधिपाः अग्न्यादित्यादयः, तेषामप्यधिपः परमेश्वरः।

कलविकरणः

कलविकरणः— कलः अव्यक्तविशेषावस्था, तद्वत् कलमुच्यते, तस्य विकरणः-विकर्ता—विकारविशेषाणां कर्ता। कृत्यल्युटो बहुलमिति कर्तरि ल्युट्। यद्वा कर्मणि ल्युटि बहुव्रीहिः, कलः विकरणीयो यस्य इति। पूर्वपदप्रकृतिस्वरश्च उपपन्नो भवति। कलशब्दः पचाद्यचि वृषादौ द्रष्टव्यः। अतः आद्युदात्तत्वम्।

कलासर्गकरः

कलासर्गकरः—कलानां—प्राणादिनामान्तानां सर्गकरः—सृष्टिकरः।

३४०

कविः

कविः—क्रान्तदर्शी, सर्वदृक्। नान्योऽतोऽस्ति द्रष्टा इत्यादिश्रुतेः।

कवीनां परमम्

कवीनां परमम्—कवीनां—मेधाविनां ज्ञानिनां परमं-पूज्यं स्वात्मत्वेनानुसन्धेयम्।

कारणम्

कारणम्—सर्वप्रपञ्चकारणम्। ब्रह्मणः सर्वप्रपञ्चकारणत्वं पक्षान्तराणि प्रदर्श्य तन्निरसन- पूर्वकं श्रुत्यैव दृढीकृतम्।

कालकारः

कालकारः—कालस्यापि कर्ता

कालः

कालः—
विश्वं कलयतीति कालः।

काष्ठा

काष्ठा—यस्मात् नास्ति पुरुषाच्चिन्मात्रघनात् परं किञ्चिदपि वस्त्वन्तरं तस्मात् सूक्ष्मत्वमहत्त्वप्रत्यगात्मत्वानां सा काष्ठा-निष्ठा-पर्यवसानं-सर्वप्रत्यग्रूपमित्यर्थः।

कृत्स्नः

कृत्स्नः—सर्वः अशेषस्वरूपः इत्यर्थः ।

कृष्णपिङ्गलः

कृष्णपिङ्गलः—देहपरिजिघृक्षायां स्त्रीपुंसशबलाकारः, परशक्त्यविनाभूतो वा ।

अथवा कण्ठे कृष्णं ललाटे पिंगलं रूपं यस्य सः कृष्णपिङ्गलः ।

३०८

केवलः

केवलः—निरुपाधिकः ।

खम्

खम्—परमाकाशम् ।

३५०

गहने प्रविष्टः

गहने प्रविष्टः—गहने - विषमे अनेकशतसहस्रविवेकविज्ञानप्रतिपक्षे देहे प्रविष्टः ।

गह्वरेष्ठः

गह्वरेष्ठः—गह्वरे विषमे अनेकानर्थसंकटे तिष्ठतीति गह्वरेष्ठः ।

गिरित्रः

गिरित्रः—गिरिं कैलासादिकं त्रायत इति गिरित्रः। गिरौ स्थित्वा सर्वान् त्रायत इति वा, गिरिर्मेघः तत्र स्थित्वा पर्जन्यरूपेण त्रायत इति वा, गिरि - प्रणवे तत्प्रतिपाद्यतया स्थितः सन् उपासकान् संसारात् त्रायत इति वा गिरित्रः।

गिरिशन्तः

गिरिशन्तः—गिरिः—कैलासः, तत्र स्थित्वा शं सुखं सर्वेषां तनोतीति गिरिशन्तः। गिरिः मेघः, तत्र स्थित्वा पर्जन्यरूपेण शं तनोतीति वा, गिरि - प्रणवे प्रतिपाद्यतया स्थित्वा शं तनोतीति वा, गिरि वेदे स्थित्वा धर्मज्ञानरूपेण शं तनोतीति वा, गिरिशन्तः।

गुणी

गुणी—अपहतपाप्मत्वादिमान्।

गुणेशः

गुणेशः—गुणानां - सत्वरजस्तमसामीशः।

गुह्यम्

गुह्यम्—गोप्यम्।

गुहाचरम्

गुहाचरम्—गुहायां बुद्धौ दर्शनश्रवणादिप्रकारैश्चरतीति गुहाचरम्।

गुहायां निहितः

गुहायां निहितः—गुहायां हृदये आत्मभूतः सन् स्थितः इत्यर्थः। एवञ्च शरीरे हृदयपुण्डरीकमध्ये बुद्धिसाक्षितया विद्यमानमात्मानं विषयसंकल्परहितः शोकमोहादिनिवृत्त्यर्थं सदा भावयेत्।

गुहाशयम्

गुहाशयम्—बुद्धौ शयानम्।

गुहाहितः

गुहाहितः—गुहायां बुद्धौ स्थितः तत्र उपलभ्यमानत्वात् ।

गूढमनुप्रविष्टः

गूढमनुप्रविष्टः—प्राकृतविषयविज्ञानैः प्रच्छन्न इत्येतत् ।

गृहीता

गृहीता—पाणिव्यापारयोग्यं सर्वं संकल्पमात्रेण व्यापारयतीत्यर्थः ।

गोपाः

गोपाः—गोप्ता रक्षक इत्यर्थः ।

गोप्ता

गोप्ता—रक्षिता ।

३६५

ग्रहणम्

ग्रहणम्—स्वयंप्रकाशमानज्ञानैकरूपम् । तथा च विषयनिर्मुक्तत्वमेव ज्ञानस्वरूपस्यात्मनो मोक्षः । विषयरूषितत्वमेव बन्धः ।

३६६

घ्रातुर्घ्रातिः

घ्रातुर्घ्रातिः—गन्धविषयिणी या अन्तःकरणवृत्तिः तस्याः प्रकाशकः घ्राता, तस्य स्वरूपभूता घ्रातिः ।

चतुरक्षरः

चतुरक्षरः—चत्वारि अकारोकारमकारार्धमात्रारूपाणि पृथिव्याद्यात्मकानि अक्षराणि यस्मिन् स चतुरक्षरः ।

चतुर्थः

चतुर्थः—विश्वाद्यपेक्षया तुरीयः शुद्धचैतन्यस्वरूपः, प्रतीयमानपादत्रयवैलक्षण्यात् ।

चतुरर्धमात्रः

चतुरर्धमात्रः—चतस्रः गार्हपत्यदक्षिणाग्न्याहवनीयैकर्षिरूपाः अर्धमात्राः यस्य सः चतुरर्धमात्रः ।

३७०

चतुरात्मा

चतुरात्मा—ओतानुज्ञात्रनुज्ञाऽविकल्परूपैश्चतूरूप इत्यर्थः । ओतानुज्ञात्रनुज्ञाऽविकल्प-

चतुश्शिरः

चतुश्शिरः—चत्वारि ब्रह्मविष्णुरुद्रसंवर्तकाग्निरूपाणि शिरांसि यस्य सः चतुश्शिराः, चतुश्शिरा एव चतुश्शिरः ।

चतुष्पात्

चतुष्पात्—कार्षापणवत्, न गौरिव, त्रयाणां विश्वादीनां पूर्वप्रविलापनेन तुरीयस्य प्रतिपत्तिरिति करणसाधनः पादशब्दः । तुरीयस्य तु कर्मसाधनः पादशब्दः । एवं चतुष्पादात्मा ।

चतुस्सप्तात्मा

चतुस्सप्तात्मा—अकारादिसंबन्धित्वेनोक्तपृथिव्यादिचतुर्विधसप्तरूपः ।

चतूरूपः

चतूरूपः—ओतानुज्ञात्रनुज्ञाऽविकल्परूपैश्चतुरूपः ।

चन्द्रतारकादन्तरः

चन्द्रतारके तिष्ठन् चन्द्रतारकादन्तरः चक्षुषि तिष्ठन् चक्षुषोऽन्तरः—अमुनिष्ठन्नि-
त्यादिवत् ।

चन्द्रतारकेतिष्ठन्

पूर्वोक्तम्

चक्षुषोऽन्तरः

पूर्वोक्तम्

चक्षुषोद्रष्टा

चक्षुः—सर्वं चष्टे इति चक्षुः सर्वप्रकाशकमित्यर्थः । **चक्षुषो द्रष्टा**—स्पष्टम् ।

चक्षुषःसाक्षी

चक्षुषश्चक्षुः—रूपप्रकाशकस्य चक्षुषो यत् ग्रहणसामर्थ्यं तत् आत्मचैतन्याधिष्ठितस्यैव । अतश्चक्षुषश्चक्षुरधिष्ठानभूतं ब्रह्मेत्यर्थः ।

३८०

चित्

चित्—स्वयंप्रकाशमानसर्वचेतनरूपा । स्वाध्यस्ते सर्वस्मिन् द्वश्येष्वनुस्यूतत्वात् ।

चिदानन्दम्

चिदानन्दं—स्वयंप्रकाशमाननिरतिशयानन्दस्वरूपं, सर्वदा अविद्यातत्कार्यरूपबन्धरहित- मित्यर्थः ।

चिदेकरसः

चिदेकरसः—सर्वप्रपञ्चविनिर्मुक्तश्चिन्मात्रः ।

चिद्घनः

चिद्घनः—चिदेव घनं स्वरूपं यस्य सः। दृश्यासंस्पृष्ट इत्यर्थः।

चिद्रूपः

चिद्रूपः—चिदेव रूपं यस्य स चिद्रूपः, चिन्मात्र इत्यर्थः।

चिन्त्यम्

चिन्त्यम्—चिन्तार्हस्वरूपम्। परमानन्दरूपत्वात्। तथा च सर्वेन्द्रियसंयमनपूर्वकं आत्मैव सर्वदा चिन्त्यः। अनुस्मर्तव्य इत्यर्थः।

चिन्मयः

चिन्मात्रः

चिन्मात्रः—दृश्यसंबन्धरहितः। सर्वाधिष्ठानभूतः प्रत्यगभिन्न इत्यर्थः।

चेतनमात्रः

चेतनमात्रः—चेत्यविनिर्मुक्तचिद्रूपः।

चेतनानां चेतनः

चेतनानां चेतनः—चेतयितॄणां ब्रह्मादीनां प्राणिनां अग्निनिमित्तमिव दाहकत्वमुदकादीनां आत्मचैतन्यनिमित्तमेव चेतयितृत्वम्। अतश्चेतनानां चेतनः परमात्मेत्यर्थः।

३९०

चेतसा वेदिव्ययः

चेतसा वेदितव्यः—विशुद्धज्ञानेन वेदितव्यः।

चेता

चेता—बोद्धा ।

३९२

चैतन्यम्

चैतन्यम्—अवस्थात्रयसाक्षिरूपं तत्त्वंपदार्थलक्ष्यं प्रत्यगभिन्नं ब्रह्मेत्यर्थः ।

३९३

छन्दसामृषभः

छन्दसामृषभः—छन्दसां वेदानामृषभ इव ऋषभः श्रेष्ठः प्राधान्यात् । अत्र छन्दसा-

----

जनिता

जनिता—जगदुत्पादयिता । स नो बन्धुर्जनिता स विधातेति श्रुतिः ।

जवनः

जवनः—दूरगामी । सर्वव्यापीति यावत् ।

जातवेदः

जातवेदः—जाताः वेदाः यस्मात् सः जातवेदः ।

जानन्

जानन्—स्वात्मानं स्वप्रकाशतया सर्वदा जानन् ।

जालवान्

जालवान्—जालं माया, तद्वान् मायावीत्यर्थः ।

जिघ्रन्

जिघ्रन्—गन्धविषयिणीं वृत्तिं साक्षात्कुर्वन् । गन्धविषयकवृत्तिप्रकाशक इत्यर्थः ।

४००

ज्ञः

ज्ञः—सर्वज्ञः ।

ज्ञानम्

ज्ञानम्—ज्ञप्तिस्वरूपं अनित्यत्वादिदोषरहितं स्वरूपचैतन्यमित्यर्थः ।

ज्ञेयम्

ज्ञेयम्—अवश्यं मुमुक्षुभिः वेदोदितमार्गद्वारा श्रवणमनननिदिध्यासनपुरस्सरमात्मतत्त्व

ज्यायान्

ज्यायान्—सर्वमहत्तरः । ततो ज्यायांश्च पूरुषः इति श्रुतिः ।

ज्येयः

ज्येयः—सर्वमहत्तरः ।

ज्येष्ठः

ज्येष्ठः—वयसाऽधिकः । कालानवच्छिन्न इत्यर्थः ।

ज्योतिर्मयः

ज्योतिर्मयः—प्रकाशस्वरूपः ।

ज्योतिषाञ्ज्योतिः

ज्योतिषाञ्ज्योतिः—ज्योतिषामग्न्यादीनां ज्योतिः अवभासकं, अग्न्यादीनामपि ज्योतिष्ट्वमन्तर्गतब्रह्मात्मचैतन्यनिमित्तं, तद्धि परमं ज्योतिः। तच्छुभ्रं ज्योतिषां ज्योतिरिति श्रुतिः।

ज्योतिः

ज्योतिः—प्रकाशरूपम्। अथ यदतः परो दिवो ज्योतिरिति श्रुतिः।

४०९

ज्वलन्

ज्वलन्—सदा ज्वलन् इत्यर्थः।

४१०

तत्

तत्—सदाख्य सर्वजगत्कारण सर्वज्ञ सर्वशक्ति।

ततमम्

ततमम्—तततमं, व्याप्ततममित्यर्थः।

तत्त्वम्

तत्त्वम्—परमार्थसत्।

तत्पुरुषः

तत्पुरुषः—तिरोभावशक्त्युपाधिकं चिन्मात्रमेव तत्पुरुषः। सर्वस्य चेतनस्य वपुःपुर्यां उषति - विशतीति तत्पुरुषः। अथवा, तत् प्रसिद्धैश्वर्यं, पुरुषः- पूरयिता विश्वस्य। विश्वातीतः परमात्मेत्यर्थः।

तपः

तपः—सर्वदोषविनिर्मुक्तं स्वयंप्रकाशमानं ब्रह्मेत्यर्थः ।

तमसः परः

तमसःपारम्

तमसः पारम्—तमसः- अविद्यालक्षणात् पारं - परं अविद्याऽसंस्पृष्टं परमार्थतत्त्वं प्रत्यग-

तमसस्साक्षी

तमसस्साक्षी—स्पष्टम् ।

तमसि तिष्ठन्

तमसि तिष्ठन् । तमसोऽन्तरः । तेजसि तिष्ठन् । तेजसोऽन्तरः । त्वचि तिष्ठन् **त्वचोऽन्तरः** । स्पष्टम् ।

तमसो द्रष्टा

तमसो द्रष्टा—तमसः-कारणस्वरूपस्य द्रष्टा साक्षी ।

४२०

तमसोऽन्तरः

<u>पूर्वोक्तम् ------→तमसि तिष्ठन्</u>

तारम्

तारम्—गर्भजन्मजरामरणसंसारमहाभयात् तारयतीति तारम् ।

तारकम्

तारकम्—संसारमहोदधेस्तारकम् ।

तुरीयतुरीयम्

तुरीयतुरीयम्—शुद्धचैतन्यस्वरूपम् ।

तुरीयम्

तुरीयं—चतुर्थं जाग्रत्स्वप्नसुषुप्त्यवस्थाऽसंस्पृष्टम् ।

तुर्योङ्काराग्रविद्योतम्

तुर्योङ्काराग्रविद्योतम्—ओतादिरूपस्य तुर्योङ्कारस्य-बिन्दुनादशक्तिशान्तरूपस्य अग्रे-पूर्वभागे तत्साक्षितया विद्योतमानं-प्रकाशमानं स्वत एव ।

तेजः

तेजः—प्रकाशस्वरूपं ब्रह्म ।

तेजसि तिष्ठन्

पूर्वोक्तम् ------→तमसि तिष्ठन्

तेजसोऽन्तरः

पूर्वोक्तम् ------→तमसि तिष्ठन्

तेजोमयः

तेजोमयः—चिन्मात्रप्रकाशप्रायः ।

४३०

त्रयाणाञ्जनकः

त्रयाणाञ्जनकः—त्रयाणां - ब्रह्मविष्णुरुद्राणां जनकः ।

त्रिकालात्परः

त्रिकालात्परः—अतीतानागतवर्तमानकालात् परः, कालानवच्छिन्न इति यावत् ।

त्रिगुणाधारः

त्रिगुणाधारः—सत्वादिगुणत्रयस्याधिष्ठानभूतः परमात्मा ।

त्रिणेत्रः

त्रिणेत्रः—स्पष्टम् ।

त्रिलोचनः

त्रिवृतम्

त्रिवृतम्—त्रिभिस्सत्वरजस्तमोभिः प्रकृतिगुणैर्वृतम् ।

त्वचितिष्ठन्

<u>पूर्वोक्तम् ------→तमसि तिष्ठन्</u>

४३७

त्वचोऽन्तरः

<u>पूर्वोक्तम् ------→तमसि तिष्ठन्</u>

दहरः

दहरः—सूक्ष्मतरः । हृदयपुण्डरीकस्य अल्पत्वात् तदन्तर्वर्तिनोऽप्यल्पत्वमेव, स्वतस्तु आकाशवत् परिपूर्णः परमेश्वर इत्यर्थः । तदुक्तं सूत्रकृता दहर उत्तरेभ्यः इति ।

दिग्भ्योऽन्तरः

४४०

दिवः परः

दिवः परः—द्युलोकात् परं ज्योतिरित्यर्थः ।

दिवि तिष्ठन्

दिवि तिष्ठन् दिवोऽन्तरः दिक्षु तिष्ठन् दिग्भ्योऽन्तरः—स्पष्टम् ।

दिवो ज्यायान्

दिवोज्यायान् । द्युलोकादपि महत्तरः ।

दिवोऽन्तरः

पूर्वोक्तम्---→ दिवि तिष्ठन्

दिव्यः

दिव्यः—द्योतनवान्, स्वयञ्ज्योतिष्ट्वात् । दिवि वा स्वात्मनि भवः, अलौकिको वा ।

दिक्षु तिष्ठन्

पूर्वोक्तम्---→ दिवि तिष्ठन्

दीपोपमः

दीपोपमः—दीपस्थानीयः, प्रकाशस्वरूपः ।

दुर्दर्शः

दुर्दर्शः—दुःखेन दर्शनमस्येति दुर्दर्शः ।

दृष्टेर्द्रष्टा

दृष्टेर्द्रष्टा—रूपविषयसंप्रयुक्तचक्षुर्द्वारा रूपोपरागेण जायमाना स्वरूपचिच्छायाव्याप्ता बुद्धिवृत्तिः पश्यन्तदृष्टिपदेन विवक्षिता, तस्या लौकिक्या दृष्टेः कर्मभूतायाः द्रष्टा - स्वकीयया

देवता

देवता—सदाख्या तेजोबन्नयोनिः ।

४५०

देवतानां परमो दैवतः

देवतानां परमो दैवतः—इन्द्रादिदेवतानामुत्कृष्टदैवत इत्यर्थः ।

देवः

देवः—द्योतनवान्, वेदनस्वरूप इत्यर्थः ।

देवानामुद्भवः

देवानामुद्भवः—देवानामिन्द्रादीनामुद्भवो विभूतियोगः तस्मिन् हेतुः ।

देवानांप्रभवः

देवानां प्रभवः—देवनामिन्द्रादीनां प्रभवहेतुः, उत्पत्तिहेतुरित्यर्थः ।

द्यावापृथिवी जनयन्

द्यावापृथिवी जनयन्—द्यावापृथिव्युपलक्षितत्रैलोक्यात्मकविराड्जनकः

द्यौः

द्यौः—द्योतनवान्, स्वयंप्रकाशस्वरूपः ।

द्रष्टव्यः

द्रष्टव्यः—साक्षात्कर्तव्य इत्यर्थः ।

द्रष्टा

द्रष्टा—दर्शनक्रियासाक्षी ।

४५८

द्रष्टुर्दृष्टिः

द्रष्टुर्दृष्टिः । द्रष्टुः—दृशिकर्तुः या दृष्टिः तस्या दृष्टेः विपरिलोपो विनाशो न विद्यते, यथाऽग्नेरौष्ण्यं यावदग्निभावि तथा, अयञ्चात्मा द्रष्टा अविनाशी, अतोऽविनाशित्वादात्मनो दृष्टिरप्यविनाशिनी, यावद्द्रष्टृभाविनी हि सा ।

धर्मः

धर्मः—सर्वप्रपञ्च धारकः ।

४६०

धर्मावहः

धर्मावहः—धर्मप्रापकः ।

धर्म्यम्

धर्म्यम्—धर्मात्—स्वरूपादनपेतमप्रच्युतम् ।

धाम

धाम—सर्वकामानामाश्रयं महोत्यर्थः ।

ध्येयः

ध्येयः—ध्यातव्यः।

४६४

ध्रुवम्

ध्रुवम्— अविचाल्यं, कूटस्थम्।

न प्रज्ञम्

नान्तःप्रज्ञम्। नबहिःप्रज्ञम्। नोभयतःप्रज्ञम्। नप्रज्ञानघनम्। नप्रज्ञं। नाप्रज्ञम्। नन्तःप्रज्ञमिति तैजसप्रतिषेधः। नबहिःप्रज्ञमिति विश्वप्रतिषेधः। नोभयतःप्रज्ञमिति अन्तरालावस्थाप्रतिषेधः। नप्रज्ञानघनमिति सुषुप्त्यवस्थाप्रतिषेधः। नप्रज्ञमिति युगपत्सर्वविषय-

न प्रज्ञानघनम्

पूर्वोक्तम्-----→न प्रज्ञम्

न बहिप्रज्ञम्

पूर्वोक्तम्-----→न प्रज्ञम्

नमामि

नमामि-अत्र नकारो निषेधार्थः। मेति प्रमावाचकत्वेन परिपूर्णानन्दसच्चिद्रूपतुर्यवाचकः। मीति तद्धिंसाकरं तदाच्छादनविक्षेपादिकारणमज्ञानमुच्यते। तस्मात् माहिंसाकरं नास्तीति

न सूक्ष्मप्रज्ञम्

न सूक्ष्मप्रज्ञम्—स्वमादेर्निषेधः।

न स्थूलप्रज्ञम्

न स्थूलप्रज्ञम्—जाग्रदवस्थातदभिमानितद्भेदानां निषेधः

नाकः

नाकः—कं सुखं, तद्विरोधी अकं दुःखं, तन्न विद्यते यस्मात्कांते स नाकः ।

नादान्तः

नादान्तः—नादविलयनस्थानभूतः परमात्मा ।

नान्तःप्रज्ञम्

<u>पूर्वोक्तम्-----→न प्रज्ञम्</u>

नाप्रज्ञम्

<u>पूर्वोक्तम्-----→न प्रज्ञम्</u>

नामरूपयोर्निर्वहिता

नामरूपयोर्निर्वहिता—नामरूपयोरात्मस्थयोर्जगद्बीजभूतयोस्सलिलस्येव फेनस्थानीययोः निर्वहिता-निर्वोढा-व्याकर्ता ।

नारायणः

नारायणः—नृ नयने, पचाद्यच्, नरः-नेता सर्वस्य स्वामी, तस्यापत्यानि नाराः सर्वे चेतना अचेतनाश्च, तेषामयनं प्रतिष्ठात्वेनाश्रयभूतः जलचन्द्राणां बिंबचन्द्रवत् कलधौतादीनां शुक्त्यादिवच्च नारायणः । पूर्वपदात्संज्ञायामिति णत्वम् ।

अथवा नर आत्मा, ततो जातान्याकाशादीनि नाराणि, तानि कार्याणि अयति कारणात्मना व्याप्नोति अतश्चान्यस्यायनं इति नारायणः ।

नाल्पः

नाल्पः—अपरिच्छिन्नः ।

नाविकल्पः

नाविकल्पः—अविकल्पत्वधर्मरहितः ।

नित्यपूतः

नित्यपूतः— नित्यशुद्धः ।

४८०

नित्यः

नित्यः—अविनाशी ।

नित्यानन्तसदेकरसम्

नित्यानन्तसदेकरसम्—अनित्यत्वपरिच्छिन्नत्वकल्पितत्वानेकरूपत्वरहितम् ।

नित्यानां नित्यः

नित्यानां नित्यः—अविनाशिनामप्यविनाशी ।

नित्यानित्यः

नित्यानित्यः—हेतुहेतुमद्रूपः ।

निदिध्यासितव्यः

निदिध्यासितव्यः—चिन्तयितव्यः । चिन्तनं नाम श्रवणमननाभ्यामधिगतेऽर्थे साक्षात्कारं जनयितुं विजातीयप्रत्ययानन्तरितसजातीयप्रत्ययप्रवाहः ।

निधानम्

निधानम्—पुरुषार्थरूपेण निधीयत इति निधानम्।

नियन्ता

नियन्ता—स्पष्टम्।

निरञ्जनः

निरञ्जनः—निर्लेपः।

निरपेक्षः

निरपेक्षः—आप्तकामत्वात्। निरपेक्षस्य साधकस्यापि माहात्म्यं प्रकटितं

निरवद्यः

निरवद्यः—अगर्हणीयः।

४९०

निरस्ताविद्यातमोमोहः

निरस्ताविद्यातमोमोहः—अविद्येति विद्याविरोधित्वकथनेन निवर्तयितुं शक्यतोक्ता। तमइत्याच्छादकत्वेन निरसनीयत्वमुक्तम्। मोह इति च विक्षेपहेतुत्वेन निरस्यत्वमुक्तम्।

निराख्यातः

निराख्यातः— निर्गताः आख्याताः क्रियापदानि यस्मात् स निराख्यातः। अनेन सेद्धरूपता उक्ता।

निरिन्द्रियम्

निरिन्द्रियम्—स्पष्टम्।

निर्गुणः

निर्गुणः—गुणरहितः ।

निर्वाणम्

निर्वाणम्—निर्गतं वाणं—स्थूलशरीरं दुर्गन्धविनाशकर्तृत्वेन तेनोपलक्षितमज्ञानं सकार्यं संस्कारश्च यस्मात् तन्निर्वाणं, सुखस्वरूपमित्यर्थः ।

निर्विकल्पः

निर्विकल्पः— निर्गताः विकल्पाः कोटिद्वयात्मिकाः वस्तुशून्या वा प्रत्ययाः यस्मात् स निर्विकल्पः ।

निश्चलम्

निश्चलम्— विक्रियाशून्यम् ।

निष्कलम्

निष्कलम्—प्राणादिकलारहितं ।

निष्क्रियः

निष्क्रियः—स्वमहिमप्रतिष्ठितः, कूटस्थ इत्यर्थः ।

निःस्पृहः

निस्पृहः—अवाप्तसकलकामत्वात् ।

५००

निहितार्थः

निहितार्थः—अगृहीतप्रयोजनः, स्वार्थनिरपेक्ष इत्यर्थः ।

नीलकण्ठः

नीलकण्ठः—कालकण्ठः ।

नृसिंहः

नृसिंहः—नृगताविति धातो रूपेण नृशब्देन त्रिविधपरिच्छेदरहित अत्मोच्यते,.. सीति तद्बन्धकमविद्यालक्षणं द्वैतं, ह इति तत्संहर्तृत्वमुच्यते। अतो नृसिंहपदस्य स्वात्मबन्धहर इत्यर्थः।

नेदिष्ठम्

नेदिष्ठम्—अन्तिकतमम्, प्रियतमम्।

५०४

नोभयतःप्रज्ञम्

पूर्वोक्तम्----->न प्रज्ञम्

पतीनां पतिः

पतीनां पतिः— पतिं पतीनां प्रथमं

पदनीयम्

पदनीयम्— गमनीयम्।

पदम्

पदम्—पदनीयं, गमनीयं, देहादावहंबुद्धिं विहाय मुमुक्षुभिर्नित्यमेव प्रत्यगात्मतया गन्तव्यमित्यर्थः।

पर आत्मा

पर आत्मा—परः—मुख्यः सच्चिदानन्दरूपः हृदयादिष्वभिव्यक्तः योगिभिरात्मत्वेन

परः पुरुषः

परः पुरुषः—परमात्माख्यः पुरुषः। यो जगतः सृष्टिस्थितिलयकर्ता यस्सत्यज्ञानानन्दरूपः

५१०

परम्

परं—निरतिशयपरमानन्दरूपं। अत एव श्रद्धापुरस्सरं प्रत्यगात्मत्वेन सदाऽनुसन्धेयं

परं पदम्

परं पदम्—परमं - निरतिशयं नित्यानन्दत्वात् निरस्तनिखिलक्रियत्वाद्वा उत्कृष्टं पदं, मुमुक्षुभिर्विज्ञेयं निर्विशेषस्वरूपमित्यर्थः।

परं पदम्—सर्वोपाधिविनिर्मुक्तं प्रत्यगभिन्ननिरतिशयानन्दपरमात्मस्वरूपम्।

परमात्मा

परमात्मा—परश्चासावात्मा चेति परमात्मा, कार्यकारणविलक्षणो नित्यशुद्धबुद्धमुक्त- स्वभावः।

परम आनन्दः

परम अनन्दः—नित्यनिरतिशयानन्दस्वरूपः, एषाऽस्य विज्ञानमयस्य परमा गतिः यास्त्वन्या देहग्रहणलक्षणाः ब्रह्मादिस्तम्बपर्यन्ता अविद्याकल्पिता गतयः ताः अपरमाः। अविद्याविषयत्वात्। इयन्तु देवत्वादिगतीनां कर्मविद्यासाध्यानां परमा उत्तमा यः समस्तात्मभावः यत्र नान्यत्पश्यति नान्यच्छृणोति नान्यद्विजानाति। एषैव परमा संपत्। सर्वासां संपदां विभूतीनामियं परमा स्वाभाविकत्वादस्याः। कृतका ह्यन्याः संपदः। तथा एषोऽस्य परमो लोकः। ये अन्ये कर्मफलाश्रया लोकाः ते अपरमाः। अयन्तु न केनचन कर्मणा मीयते, स्वाभाविकत्वात्। एषोऽस्य परमो लोकः। तथा एषोऽस्य परम आनन्दः। यान्यन्यानि विषयेन्द्रियसंबन्धजनितानि आनन्दजातानि तान्यपेक्ष्य एषोऽस्य परम आनन्दः, नित्यत्वात्। यो वै भूमा तत्सुखमिति श्रुत्यन्तरात्। यत्रान्यत्पश्यन्यद्विजानाति तदल्पं मर्त्यं अमुख्यं सुखं, इदन्तु तद्विपरीतम्। अत एव एषोऽस्य परम आनन्दः। तस्मान्निरतिशयपरमानन्दस्वरूपे आत्मनि मुमुक्षुभिर्मुक्तैश्च मोक्षार्थतया सुखार्थतया च मनःप्रणिधानं कार्यम्।

परमा गतिः

परमा गतिः—परमा-ज्ञानकर्मसाध्यब्रह्मलोकाद्यपेक्षया उत्कृष्टा गतिः आत्मस्वरूपमित्यर्थः।

परमात्मरूपम्

परमात्मरूपम्—प्रत्यगभिन्नब्रह्मस्वरूपम्।

परमा सम्पत्

परमा संपत्—निरतिशयविभूतिस्वरूपा—

परमेश्वरः

परमेश्वरः—उत्कृष्टब्रह्मादिनियन्ता।

परमेष्ठी

परमेष्ठी—परमे - जगद्रक्षणभावे - स्थितः।

परमोऽक्षरः

परमोऽक्षरः—परमः - प्रकृष्टः अक्षरः - व्यापकः, परमव्यापक इत्यर्थः।

५२०

परमो लोकः

परमो लोकः— उत्कृष्टः स्वरूपभूतो लोकः, कर्मासाध्यः, आत्मैवेत्यर्थः।

परमं पदम्

परमं ब्रह्म

परमं ब्रह्म--परमं-उत्कृष्टं ब्रह्म-देशकालवस्तुकृतपरिच्छेदशून्यं, अत एव सर्वप्रत्यगात्मरूपं, यदज्ञातं सत् सकलजगद्रूपेण विवर्तते यच्च सर्ववेदान्तप्रतिपाद्यं यज्ज्ञानात् सकलसंसारबीज-निवृत्तिः यच्च सर्वैर्मुमुक्षुभिरात्मत्वेन सेव्यं तत् परं ब्रह्मेत्यर्थः।

परमं व्योम

परमं व्योम—प्रकृष्टाकाशकल्पं परं ब्रह्म।

परमं साम्यम्

परमं साम्यम्—परमं प्रकृष्टं निरतिशयं साम्यं अद्वयलक्षणं ब्रह्मेत्यर्थः।

परमं सुखम्

परमं सुखम्—निरतिशयं सुखं, आत्मभूतम्। नन्वात्मा निरतिशयसुखस्वरूपश्चेत् किमिति सर्वेषां न प्रतीयते - सत्यं - अविद्यावतां सुखरूपत्वेन आत्मनोऽप्रतिभानेऽपि विद्यावतां प्रतिभानात्।

परा गतिः

परागतिः—परा-प्रकृष्टा गतिः गन्तव्यं-प्राप्तव्यं वस्तु। अन्यास्तु गतयः पुनरावृत्तिमत्त्वाद- पराः। उक्तविधा तु गतिः पुनरावृत्तिराहित्येन परा।

परात्परः

परात्परः—परात्-हिरण्यगर्भात् परः-श्रेष्ठः।

परादेवता

परामृतम्

परामृतम्—आपेक्षिकामृतात्कर्मफलादुत्कृष्टत्वेसत्यविनाशि। ईदृशमात्मस्वरूपं परमेश्वर- प्रसादलभ्यम्।

५३०

परायणम्

परायणम्—परं अयनं - प्राप्यं परायणम्। यस्मिन्नधिगते भिद्यते हृदयग्रन्थिः, सर्वे संशयाच्छिद्यन्ते, सर्वाणि कर्माणि क्षीयन्ते, यस्य ज्ञानमात्रेण आनन्दलक्षणो मोक्षः प्राप्यते यद्विद्वान्न बिभेति कुतश्चन, यत्प्रविष्टस्य न विद्यते पुनर्भवः, यस्य च वेदनात् तदेव भवति, यद्विहाय अपरः पन्था नृणां नास्ति, तदेव परायणम्।

परावरः

परावरः—परश्च कारणात्मना अवरश्च कार्यात्मना वर्तत इति परावरः। परो-हिरण्यगर्भः

परादेवता

परादेवता—परंब्रह्मेत्यर्थः।

परामृतम्

परिपूर्णः

परिपूर्णः—परितः-समन्तात् पूर्णः।

परिभवासहः

परिभवासहः—न लौकिकमन्दपुरुषवत् अयं मन्दप्रस्थानः परिभवसहिष्णुः। अतः संहरत्येव सदासंहार्यमविद्यादिलक्षणं जगत्।

परिभूः

परिभूः—सर्वेषामुपर्युपरि भवतीति परिभूः

परोवरीयान्

परोवरीयान्—वरीयसोऽप्येष वर इति परोवरीयान्।

परंज्योतिः

परंज्योतिः—आदित्याद्यपेक्षया उत्कृष्टप्रकाशस्वरूपम्। उत्कृष्टप्रकाशत्वादेव बाह्यव्या-पारविनिर्मुक्तस्य एकान्तनिष्ठस्य आत्मध्यानपरस्य आत्मसाक्षात्कारः सुलभसाद्ध्यः इत्युक्तं भवति।

परंधाम

५४०

परंपदम्

परं ब्रह्म

परं ब्रह्म—अपरब्रह्मभ्यो हिरण्यगर्भादिभ्यः परं सत्यज्ञानानन्तानन्दादिरूपं निष्कलं सर्वद्वन्द्वविनिर्मुक्तं सर्वप्रत्ययरूपं ब्रह्म।

परं श्रृङ्गम्

परंश्रृङ्गम्—अत्र शृंगशब्देन प्रणवस्यांशो लक्ष्यते। यच्छन्दसामृषभो विश्वरूप इति प्रणवस्य ऋषभत्वेन वर्णितत्वात्। तथा च ब्रह्मशब्दान्त्यमकारात्मकप्रणवमकारार्थभूतं ब्रह्मेत्यर्थः।

पवित्रम्

पवित्रम्-पावनम्। परमस्तु पुमान् ध्यातः दृष्टः कीर्तितः श्रुतः पूजितः स्मृतः प्रणतः सर्वान् पाप्मनः उन्मूलयतीति पवित्रम्।

पश्यन्

पश्यन्—अलुप्तदृक्स्वभावः।

पक्षपातविनिर्मुक्तम्

पक्षपातविनिर्मुक्तम् — हस्तिपुत्तिकादिशरीरेषु ऐकरूप्येण वर्तमानम्।

पापनुत्

पापनुत्—पापनिवर्तकः।

पापेनानन्वागतम्

पापेनानन्वागतम्—पापेनासंबद्धम्।

पुच्छम्

पुच्छम्—पुच्छवत् पुच्छं आधारमित्यर्थः।

पुण्येननन्वागतम्

पुण्येनानन्वागतम्—पुण्येनासंस्पृष्टम्।

पुत्रात्प्रेयः

पुत्रात्प्रेयः—प्रियतरम् ।

पुराणः

पुराणः—पुराऽपि नवः, पुरातन इत्यर्थः ।

पुरातनः

पुरातनः—चिरन्तनः ।

पुरिशयः

पुरिशयः—सर्वशरीरानुप्रविष्टः ।

पुरुरूपः

पुरुरूपः—अनेकरूपः ।

पुरुषसंज्ञः

पुरुषसंज्ञः—पुरुषनामा ।

पुरुषः

पुरुषः—सर्वस्य कार्यप्रपञ्चस्य स्वरूपेण पूरयिता । यद्वा सर्वासु पूर्षु शेत इति पुरुषः ।

पुरुषाणां कर्ता

पुरुषाणां कर्ता—आदित्यादिपुरुषाणां कर्तेत्यर्थः ।

पुष्करम्

पुष्करम् पुष्कलम् ।

पूर्णम्

पूर्णम्—अनन्तमित्यर्थः। तथा च देहादिपरिच्छेदराहित्येन सर्वगतत्वेन सर्वात्मिकतया च सदा अनुसन्धेय इति।

५६०

पूर्णानन्दैकबोधः

पूर्णानन्दैकबोधः—अपरिच्छिन्नानन्दैकप्रकाशरूपः। यस्मादात्मस्वरूपमेवं तस्मादनात्म- निरसनपूर्वकं आत्मन्येव मनोलयः संपादनीयः।

पूतः

पूतः—अविद्यादिदोषरहितः।

पूर्व्यम्

पूर्व्यम्—चिरन्तनम्।

पृथिव्या अन्तरः

पृथिव्यां तिष्ठन्। पृथिव्या अन्तरः। प्राणे तिष्ठन्। प्राणादन्तरः। स्पष्टम्।

पृथिव्या ज्यायान्

पृथिव्यां तिष्ठन्

स्पष्टम्।

प्रकाशः

प्रकाशः—दीपवत् प्रकाशयतीति प्रकाशः।

प्रकाशेभ्यः प्रकाशः

प्रकाशेभ्यः प्रकाशः—अग्न्यादित्येभ्योऽपि प्रकाशस्वरूपः।

प्रचोदयिता

प्रचोदयिता -प्रेरयिता सर्वान्तर्यामितया।

प्रज्ञः

प्रज्ञः—प्रत्यक् स्वप्रकाशः साक्षी चिद्रूपः।

५७०

प्रज्ञानघनः

प्रज्ञानघनः—चैतन्यघनः। चैतन्यैकस्वरूप इति यावत्।

प्रज्ञात्मा

प्रज्ञात्मा—परमात्मा।

प्रज्ञानम्

प्रज्ञानम्—प्रकृष्टं-निरस्तसमस्तोपाधिकं सकलकल्पनास्पदं ज्ञानं-सर्वदा सर्ववस्त्वभासकं

प्रणवः

प्रणवः सर्वपुरुषार्थान् प्रणामयति प्रापयतीति प्रणवः।

प्रतिबोधविदितम्

प्रतिबोधविदितं—बोधंबोधं प्रति विदितं प्रतिबोधविदितम्। बोधशब्देन बौद्धाः प्रत्यया उच्यन्ते। सर्वे प्रत्यया विषयीभवन्ति यस्य स आत्मा सर्वबोधान् प्रति - सर्वप्रत्ययदर्शी। दृक्शक्ति-स्वरूपमात्रः प्रत्ययैरेव प्रत्ययाविशिष्टतया लक्ष्यते, नान्यत् द्वारान्तरमात्मनो विज्ञानाय। अतः प्रत्ययप्रत्यगात्मतया विदितं ब्रह्म प्रतिबोधविदितम्।

प्रतिष्ठा

प्रतिष्ठा—प्रतितिष्ठति सर्वमस्मिन् ब्रह्मणीति प्रतिष्ठा।

प्रत्यक्

प्रत्यक्—अनृतजडदुःखान्तवद्भ्यः शरीरेन्द्रियादिभ्यः इदंकारास्पदेभ्यः प्रातिकूल्येन अञ्चति गच्छति इति प्रत्यक्। सर्वान्तर इत्यर्थः।

प्रत्यगात्मा

प्रत्यगात्मा—प्रत्यक्चासावात्मा चेति प्रत्यगात्मा। प्रतीच्येव आत्मशब्दो रूढो लोके, नान्यस्मिन्। व्युत्पत्तिपक्षेऽपि तत्रैव आत्मशब्दः प्रवर्तते।

प्रत्यगेकरसः

प्रत्यगेकरसः—प्रत्यगात्मस्वभावः।

प्रधानक्षेत्रपतिः

प्रधानक्षेत्रज्ञपतिः—अव्यक्तविज्ञानात्मनोः पालयिता।

५८०

प्रध्यायितव्यः

प्रध्यायितव्यः—प्रकर्षेण ध्यातव्यो मुमुक्षुभिरित्यर्थः।

प्रपञ्चोपशमः

प्रपञ्चोपशमः—जाग्रदादिस्थानधर्मरहितः।

प्रभुः

प्रभुः—समर्थः।

प्रशान्तम्

प्रशान्तम्—अविद्यादिदोषरहितम्।

प्रसृतम्

प्रसृतम्—व्याप्तं परिपूर्णमित्यर्थः।

प्राजापत्यम्

प्राजापत्यम्—प्रजापतिना हिरण्यगर्भेणाख्यातं, प्रजापतिपदप्रदात् वा।

प्राज्ञः

प्राज्ञः—परमार्थस्वभावः परमात्मा।

प्राणशरीरः

प्राणशरीरः—प्राणो लिङ्गात्मा विज्ञानक्रियाशक्तिद्वयसम्मूर्छितः।

प्राणशरीरनेता

प्राणशरीरनेता—प्राणश्च शरीरश्च तत् प्राणशरीरं तस्य नेता, प्राणशरीरयो र्वा नेता।

प्राणः

प्राणः—परमात्मा। प्राणशब्दस्य परमात्मपरत्वं वर्णितं

५९०

प्राणस्य द्रष्टा

प्राणस्य द्रष्टा—**प्राणस्य साक्षी**। स्पष्टम्।

प्राणस्य प्राणः

प्राणस्यप्राणः—प्राणस्य-प्राणाख्यवृत्तिविशेषस्य प्राणः। तत्कृतं हि प्राणस्य प्राणन- सामर्थ्यम्। न ह्यात्मानधिष्ठितस्य प्राणनमुपपद्यते।

प्राणस्य साक्षी

प्राणस्य द्रष्टा—**प्राणस्य साक्षी**। स्पष्टम्।

प्राणादन्तरः

स्पष्टम्।

प्राणे तिष्ठन्

स्पष्टम्।

प्रादेशमात्रः

प्रादेशमात्रः—प्रदेशैः द्युमूर्धादिभिः पृथिवीपादान्तैः अध्यात्मं मीयते इति प्रादेशमात्रः। मुखादिषु वा करणेषु प्रदेशेषु अत्तृत्वेन मीयत इति प्रादेशमात्रः। द्युलोकादिपृथिव्यन्तप्रदेशपरिमाणमात्रो वा प्रादेशमात्रः। प्रकर्षेण शास्त्रेण आदिश्यन्त इति प्रादेशाः द्युलोकादय एव, तावत्परिमाणो वा प्रादेशमात्रः। शाखान्तरे तु मूर्धादिचुबुकान्तप्रतिष्ठित इति प्रादेशमात्रं कल्पयन्ति।

प्रेरिता

प्रेरिता—अन्तर्यामितया सर्वप्रवर्तकः।

५९७

प्रोतः

प्रोतः—सर्वत्र कार्ये अधिष्ठातृत्वेन अनुस्यूतः।

फलमुक्तिप्रदायी

फलमुक्तिप्रदायी—श्रवणमननादिफलभूतमोक्षप्रदाता। संसारमोचक इत्यर्थः।

बलप्रमथनः

बलप्रमथनः—बलानि प्रमथनीयानि लोडयितव्यानि परिपाचयितव्यानि यस्य सः तथा।

६००

बलविकरणः

बलविकरणः—बलस्य विविधं कर्ता। कृत्यल्युटो बहुलमिति कर्तरि ल्युट्। बलवैचित्र्यकारीति यावत्। यद्वा कर्मणि ल्युटि बहुव्रीहिः। बलं विकरणीयं यस्य स तथा। तथा च पूर्वप्रकृतिस्वरश्च उपपन्नो भवति। बलशब्दः पचाद्यचि वृषादिर्द्रष्टव्यः।

बलम्

बलम्— चैतन्यरूपम्। सर्वद्वैतपरिभवसंहारसामर्थ्यरूपत्वात्। **आत्मचैतन्यरूपं**

बहुधाचिन्त्यमानः

बहुधा चिन्त्यमानः—बहुधा अस्ति नास्ति, कर्ताऽकर्ता, शुद्धोऽशुद्धः, इत्याद्यनेकधा वादिभिश्चिन्त्यमानः। चैतन्यविशिष्टः स्थूलदेहः आत्मेति **लोकायतभेदाः**। प्राण एव आत्मेति

बहुधा विकुर्वन्

बुद्धः

बुद्धः—बोधः। प्रपञ्चासंस्पृष्ट इत्यर्थः।

बुद्धेर्द्रष्टा

बुद्धेर्द्रष्टा। स्पष्टम्।

बुद्धेस्साक्षी

बुद्धेस्साक्षी। स्पष्टम्।

बृहत्

बृहत्—परिपूर्णं सर्वकारणत्वात्।

ब्रह्म

ब्रह्म—बृहत्तमम् । नित्यं परिपूर्णं सर्वाधिष्ठानं प्रत्यगभिन्नम् । प्रत्यगभिन्नत्वञ्च स्फुटीकृत-
मभियुक्तैः—

ब्रह्मणोऽधिपतिः

ब्रह्माधिपतिः । ब्रह्मणोऽधिपतिः । ब्रह्म चासावधिपतिः—अधिकं पालयिता । ब्रह्मणोऽधिपतिः—ब्रह्मणो हिरण्यगर्भस्य पतिः उपलक्षणत्वात् जगत्पतीनामपि पतिः ।

६१०

ब्रह्मतत्त्वम्

ब्रह्मतत्त्वम्—तत्त्वभूतं ब्रह्मेत्यर्थः । ब्रह्मणस्तत्त्वरूपत्वं द्वेधा-अध्यस्तस्य सर्वस्य प्रपञ्चस्य अरोपाधिष्ठानत्वेन बाधावधित्वेन च ।

ब्रह्मपरम्

ब्रह्मपरम्—ब्रह्मणो हिरण्यगर्भात् परम् ।

ब्रह्मपुरम्

ब्रह्मपुरम्—ब्रह्मैव पुरं ब्रह्मपुरम् । पुरमिव पुरं सर्वव्यवहारास्पदत्वात् ।

ब्रह्मभावम्

ब्रह्मभावम्—ब्रह्मस्वरूपम् ।

ब्रह्मयोनिः

ब्रह्मयोनिः—ब्रह्म च तद्योनिश्च ब्रह्मयोनिः । अपरस्य ब्रह्मणः वेदानां वा योनिः ।

ब्रह्मलोकः

ब्रह्मलोकः—ब्रह्मैव लोको ब्रह्मलोकः ।

ब्रह्मादिवन्दितः

ब्रह्मादिवन्दितः । वन्दनं स्तुत्यर्चनादेरुपलक्षणम् ।

६१७

ब्रह्माधिपतिः

पूर्वोक्तम्----->ब्रह्मणोऽधिपतिः

भगवान्

भगवान्-निरतिशयैश्वर्यादिसंपन्नः ।

भगेशः

भगेशः । भगस्य-ऐश्वर्यादेः ईशः-स्वामी ।

६२०

भद्रः

भद्रः—मङ्गलस्वरूपः । परमानन्दानुभवरूपत्वात् ।

भवः

भवः—भवत्यस्मात् सर्वमिदञ्जगदिति भवः।

भवोद्भवः

भवोद्भवः—भवस्य-संसारस्य उद्भावयिता यस्मादुद्भावयिता तस्मात् स एव भवमोचकश्च। अतःस एव संसारपाशमुमुक्षुभिः सेव्य इति भावः।

भाः

भान्। भाः। स्वप्रकाशरूपः। स्वेनैव आत्मरूपेण प्रकाशते न त्वनात्मना दृश्येन

भान्

<u>पूर्वोक्तम्-----→भाः</u>

भामनीः

भामनीः—एष हि यस्मात् सर्वेषु लोकेषु आदित्यचन्द्राग्न्यादिरूपैर्भाति-दीप्यते, अतो भामानि नयतीति भामनीः।

भारूपः

भारूपः—भा-दीप्तिश्चैनन्यलक्षणा रूपं यस्य स भारूपः।

भावग्राह्यः

भावग्राह्यः—भावेन-विशुद्धान्तःकरणेन गृह्यत इति भावग्राह्यः।

भावाभावकरः

भावाभावकरः—भावानां सर्वेषां अभावकरः। नाशकरः उपलक्षणमेतत्। सृष्टिस्थित्यो-
रपि तदधीनत्वात्। तथा च सृष्टिस्थितिसंहारकर्तेत्यर्थः।

भीषणः

भीषणः—महावाक्यजन्यवृत्त्यारूढः सन् अज्ञानतत्कार्यभयंकरः। अथवा महास्फुरण-
स्वभावत्वात् कदाचिदपि तमआदिकं न स्पृशतीति।

६३०

भुवनस्य नाभिः

भुवनस्यनाभिः भुवनस्य—भूतजातस्य नाभिः-उपादानमित्यर्थः।

भुवनस्य गोप्ता

भुवनस्य गोप्ता-लोकरक्षिता।

भुवनेशः

भुवनेशः—भुवनानां लोकानां ईशः।

भूतपालः

भूताधिपतिः। भूतपालः। भूतनियन्ता, भूतरक्षकश्च।

भूतभव्यस्येशानः

भूतभव्यस्येशानः। उपलक्षणमेतत्। कालत्रयवर्तिपदार्थानां नियन्तेत्यर्थः।

भूतम्

भूतम्—अवितथस्वरूपं सदा एकरूपं नित्यनिर्वृत्तं नान्याधीनं ब्रह्मेत्यर्थः।

भूतयोनिः

भूतयोनिः। भूतकारणम्।

भूतात्मा

भूतात्मा—स्थावरजंगमानामात्मा, परमात्मेत्यर्थः।

भूताधिपतिः

पूर्वोक्तम्---→ भूतपालः

भूतेभूतेव्यवस्थितः

भूते भूते व्यवस्थितः तस्मिन् तस्मिन् शरीरे, भूताभ्यासश्चतुर्विधशरीरसंग्रहार्थः, व्यवस्थितः-विविधं तत्र तत्र शरीरान्तःकरणादिसादृश्यमवलम्ब्य अवस्थितः-अवस्थानं प्राप्तः। तथा च परमात्मा एक एव सन् सर्वेष्वपि स्थावरजङ्गमशरीरेषु प्रत्यगात्मतया स्थावराद्युपाधिनाशेऽपि नित्यतया अवस्थित इत्येवमात्मानं सदा पश्येत्।

६४०

भूमा

भूमा—महान् निरतिशयस्वरूपः। परमात्मेत्यर्थः।

मतेर्मन्ता

मतेर्मन्ता—मतेः मनोवृत्तेः मन्ता-प्रकाशयिता

मदामदः

मदामदः—सहर्षोऽहर्षश्च। सहर्षः निरतिशयस्वरूपत्वात्, अहर्षः स्वव्यतिरिक्त वस्त्वन्तराभावात्, अत एव मूर्तिमत्त्वाभावात् आकाररहित्यात् अशक्यज्ञान आत्मेत्युक्तं भवति। ननु तर्हि आत्मज्ञानार्थं यत्नो न कर्तव्य इति चेत्-सत्यम्-अनात्मतिरस्करणे एव यत्नः कर्तव्यः। तदुक्तं **भाष्यकारैः**- "तस्मादविद्याध्यारोपितनिराकरणमात्रं ब्रह्मणि कर्तव्यम्। न तु ब्रह्मज्ञाने यत्नः, अत्यन्तप्रसिद्धत्वात्। अविद्याकल्पितनामरूपविशेषाकारापहृतबुद्धीनां, अत्यन्तप्रसिद्धं सुविज्ञेयमासन्नतरमात्मभूतमपि अप्रसिद्धं दुर्विज्ञेयमतिदूरमन्य एव च प्रतिभाति। बाह्याकारनिवृत्तबुद्धीनान्तु लब्धगुर्वात्मप्रसादानां नातः परं सुखं सुप्रसिद्धं सुविज्ञेयं स्वासन्नमस्ति-तथा चोक्तम्-प्रत्यक्षावगमंधर्म्यमित्यादि। केचित्तु पण्डितम्मन्याः- निराकारत्वादात्मवस्तु नोपैति बुद्धिः, अतो दुस्साध्या सम्यज्ञाननिष्ठेत्याहुः। सत्यमेवं गुरुप्रसादरहितानां अश्रुतवेदान्तानां अन्तर्बहिर्विषयासक्तबुद्धीनां सम्यक् प्रमाणेषु अकृतश्रमानां, तद्विपरीतानान्तु लौकिकग्राह्यग्राहकद्वैतवस्तुनि बुद्धिर्नितरां दुस्संपादा। आत्मचैतन्यव्यतिरेकेण वस्त्वन्तरस्यानुपलब्धेः। यथा चैतदेवमेव नान्यथा इत्यवोचाम।

मध्येस्थाता

मध्येस्थाता—मध्ये-स्वास्मन्येवावस्थाता।

मन आदि साक्षी

मनआदिसाक्षी । स्पष्टम् ।

मनआद्यविता

स्पष्टम् ।

मनसाऽभिक्लृप्तः

मनसाऽभिक्लृप्तः—मनसा-मननरूपेण सम्यग्दर्शनेन अभिक्लृप्तः—अभिसमर्थितः— अभिप्रकाशित इत्येतत् ।

मनसि तिष्ठन्

मनसितिष्ठन् - -स्पष्टम् ।

मनसो जवीयः

मनसो जवीयः—मनसःसंकल्पादिलक्षणात् जवीयः—जववत्तरम् । इह देहस्थस्य मनसः ब्रह्मलोकादिदूरसंकल्पनं क्षणमात्रादित्यतो मनो जविष्ठमिति लोकप्रसिद्धं, तस्मिन् मनसि ब्रह्मलोकादि द्रुतं गच्छति सति प्रथममाप्त इवात्मचैतन्याभासो गृह्यते, अतो मनसो जवीयः इति।

मनसो द्रष्टा

-स्पष्टम् ।

६५०

मनसोऽन्तरः

-स्पष्टम् ।

मनसो मनः

मनसः साक्षी

मनसस्साक्षी—स्पष्टम् ।

मनीषी

मनीषी-मनस ईशिता, सर्वज्ञ ईश्वर इत्यर्थः।

मनसोमनः

मनसोमनः—मनसः- अन्तःकरणस्य मनः। न ह्यन्तःकरणं अन्तरेण चैतन्यज्योतिषो दीधितिं स्वविषयसंकल्पाध्यवसायादिसमर्थं स्यात्। तस्मात् मनसः संकल्पाध्यवसायादिसाम- र्थ्यरूपं चैतन्यमेव मनसो मन इत्युच्यते।

मनोन्मनः

मनोन्मनः—मनः - मन्ता जीवः, तस्य उन्मानयिता उद्बोधकः, चैतन्योदीपकः।

मनोमयः

मनोमयः—मनोवृत्तिभिरेव विभाव्यत इति मनोमयः।

मन्तव्यः

मन्तव्यः—श्रुत्यनुमतया असंभावनादिनिरसनक्षमया युक्त्या सदा अनुसन्धेय इत्यर्थः।

मन्ता

मन्ता—मनस्सन्निहितः, मनोव्यापारसाक्षी।

मन्तुर्मतिः

मन्तुर्मतिः—नित्यचैतन्यस्वरूपः।

६६०

मन्वानः

मन्वानः—मनआद्युपाध्यभावेऽपि स्वयं मनआदिव्यापारप्रकाशनस्वभावः।

महत्पदम्

महत्पदम्—पद्यते सर्वेणेति पदं महच्च तत् पदं चेति महत्पदम् ।

महतः परः

महतः परः-महतः महत्तत्त्वात् बुद्ध्याख्यात् परः विलक्षणः नित्यविज्ञप्तिस्वरूपः ।

महतो महीयान्

महतो महीयान्-महतः परिमाणात् पृथिव्या यो महत्तरः ।

महद्भयम्

महद्भयम् - बिभेत्यस्मादिति भयं महच्च तद्भयञ्च महद्भयम् अविदुषां भयहेतुत्वेऽपि विदुषामभयकारणं ब्रह्म। तदुक्तं श्रुत्या- "यदा ह्येवैष एतस्मिन्नदृश्येऽनात्म्येऽनिरुक्तेऽनिलयनेऽभयं प्रतिष्ठां विन्दते, अथ सोऽभयं गतो भवति, यदा ह्येवैष एतस्मिन्नुदरमन्तरं कुरुते, अथ तस्य भयं भवति इति। उक्तञ्च **भाष्यकारैः** एतच्छ्रुतिविवरणावसरे-सर्वतो निर्भया ब्राह्मणा दृश्यन्ते सत्सु भयहेतुषु, तच्चायुक्तमसति भयत्राणे ब्रह्मणि, तस्मात्तेषामभयदर्शनादस्ति तदभयकारणं ब्रह्म" इति।

महद्भूतम्

महद्भूतम्—महच्च तत् भूतञ्च महद्भूतं, सर्वमहत्तरत्वादाकाशादिकारणत्वाच्च, भूतं

महद्यशः

महद्यशः—महायशोहेतुः, तद्धेतुत्वात् ताच्छब्द्यम् ।

महर्षिः

महर्षिः—महाद्रष्टा। सर्वार्थसाधनदृष्टिः। सर्वज्ञ इत्यर्थः।

महः

महः—चित्तेजोरूपं सर्वदृश्यविनिर्मुक्तमित्युक्तं भवति ।

महाग्रासः

महाग्रासः—सर्वजगद्भक्षकः। स्वसत्ताचैतन्याभ्यां स्वाध्यस्तसर्वजगद्व्यापनेन स्वात्मतिरोधायकत्वात्। सद्धीदं सर्वं सत्सदिति चिद्धीदं सर्वं काशते काशते च इति श्रुतेः।

६७०

महाचित्

महाचित्—अपरिच्छिन्नचिद्रूपः।

महाचैतन्यः

महाचैतन्यः—परिपूर्णचिद्रूपः।

महाज्ञेयः

महाज्ञेयः—सर्वज्ञेयसमष्टिभूतः। यद्वा प्रशस्तो ज्ञेयः। अपवर्गहेतुत्वात्।

महात्मा

महात्मा—सर्वेषां प्रत्यगात्मा।

महादेवः

महादेवः—

ध्यानादियोग्यविग्रहपरिग्रहादिक्रीडावन्तो देवाः, तेषां प्रशस्तो महादेवः। क्रियाशक्तिमधिष्ठाय योऽम्बिकया सह जगदनुगृह्णाति स महादेवः। अथवा यः सर्वान् भावान् परित्यज्य आत्मज्ञानयोगैश्वर्ये महति महीयते तस्मादुच्यते महादेव इति। अस्यायमर्थः—सर्वान् भावान्—सकलपदार्थान् परित्यज्य—समन्तात् त्यक्त्वा आत्मज्ञानयोगैश्वर्ये—अहं ब्रह्मास्मीत्यात्मज्ञानं तदेव योगैश्वर्यं तस्मिन् महति-प्रौढे निष्ठां लब्ध्वा परमानन्दरूपस्वात्मतत्त्वस्फूर्तिवशात् महीयते। अथवा सर्वान् भावान् परित्यज्य-बाह्यविषयासक्तिं परित्यज्य आत्मज्ञानयोगैश्वर्ये विषयीकृतः सन् योगिभिर्महीयते-पूज्यते, योगिनां यो वेदान्तमहावाक्यजन्यसाक्षात्कारः तस्य विषयो भवति। योगिभिः ज्ञानेन सर्वदा पूज्यत इत्यर्थः।

महान्

महान्—परिपूर्णः.

महान् प्रभुः

महान् प्रभुः—बन्धमोक्षकारणत्वात्

महानन्दः

महानन्दः—अपरिच्छिन्नानन्दरूपः।

महाप्रभुः

महाप्रभुः—स्वसन्निधिसत्तामात्रेण सर्वप्रवर्तकस्वरूपः।

महामायम्

महामायम्—सर्वजगदुपादाननिमित्तभूतं सर्वात्मकं सर्वनियन्तृ सर्वपालयितृ सर्वोपसंहार-कमेकमद्वितीयन्निष्क्रियन्निरवयवं शान्तं सर्वदोषरहितं परिपूर्णशिवमित्यर्थः।

६८०

महाविभूतिः

महाविभूतिः—ब्रह्मादिस्तंबपर्यन्तचेतनरूपेण आकाशाद्यणुपर्यन्ताचेतनरूपेण सच्चि- दानन्दपरिपूर्णरूपेण च स्थितं।

महासत्

महासत्—अपरिच्छिन्नसद्रूपः

महिमा

महिमा—महत्त्वं निरतिशयैश्वर्यरूपम्। भावभवितोरभेदविवक्षया महानित्यर्थः

महेश्वरः

महेश्वरः—महांश्चासावीश्वरश्च महेश्वरः। पूजनार्थं महत्त्वविशेषणं, नाल्पेश्वरत्व निवृत्त्यर्थं, पदश्रुत्यैव निरतिशयैश्वर्यवति तस्य वृत्तेः। सन्महदित्यादिना समासः। आन्महदित्यादिना आत्वम्। एवञ्च स एव सर्वदा प्रत्यगात्मत्वेन उपास्यो मोक्षार्थिभिः। स एव च जगतः सृष्टिस्थितिसंहारकारणभूतः।

मानम्

मानम्—सर्वसाधकप्रमाणरूपम् । र

मायी

मायी—मायाधिष्ठाता ।

मीढुष्टमः

मीढुष्टमः—सेक्तृतमः, जगतां पिता।

मुक्तम्

मुक्तम्—पारवश्यरहितम् । अत एव शुद्धं बुद्धश्च ।

मृत्युमृत्युः

मृत्युमृत्युः—पूर्वमृत्युशब्देन मरणशीलं सर्वात्मकमज्ञानमुच्यते। तस्याज्ञानस्य तत्त्वमस्यादिवाक्यजन्यवृत्त्यारूढस्सन् संहरतीति मृत्युमृत्युः

६८९

मोदनीयम्

मोदनीयम्- हर्षणीयं, परमानन्दस्वरूपत्वात्। ननु आत्मनः परमानन्दस्वरूपत्वे किमिति सर्वै र्नानुभूयते, प्रत्युत दुःखादिकमनुभूयते इति चेत्, वैराग्यादिपुरस्सरं चित्तवृत्तिनिरोधाभावादिति ब्रूमः।

इति श्रीमत्परमहंसपरिव्राजकाचार्याभिनवनारायणेन्द्रसरस्वतीपूज्यपादशिष्य श्रीमत्परमशिवेन्द्रसरस्वतीविरचिते वेदान्तनामरत्नसहस्रव्याख्याने स्वरूपानुसन्धानाख्ये

द्वितीयः खण्डः

६९०

यज्ञोपवीतम्

<u>यज्ञोपवीतम्</u>—परमात्मनस्तादात्म्यलक्षणसामीप्यमागतं जैवमेव कर्तृत्वादिरहितं वास्तवं रूपमित्यर्थः।

यक्षम्

<u>यक्षम्</u>—पूज्यम्। परमेश्वरस्य सर्वपूज्यत्वं

योगिध्येयम्

<u>योगिध्येयं</u>—योगिभिः यमनियमादिभिर्युक्तैर्योगिभिर्यतिभिश्च हृदयकमले सदा ध्येयम्।

६९३

योनिः

<u>योनिः</u>—कारणम्।

रसः

<u>रसः</u>—यदिदं पञ्चकोशान्तरे अपरोक्षतयाऽभासमानं सत्यं ज्ञानमनन्तं ब्रह्मेत्युदीरितलक्षणं ब्रह्म सोऽयं मधुरादिरसवत् सर्वदा प्रत्यग्दृष्टिभिर्योगिभिः साक्षात् अव्यवधानेनास्वादनीयत्वाद्रसः आत्मज्ञो हि अनाद्यन्तमेतमेवात्मानं निरतिशयानन्दरूपतया रसात्मकं स्वात्मनि साक्षात्कृत्य सर्वेषु देशेषु सर्वेष्वपि कालेषु सुखी भवति। एतद्व्यतिरिक्तमधुराद्यनित्यबाह्यरसलाभे तु क्वचित् कदाचिदेव सुखित्वं, अतो विद्वदनुभवबलादस्य रसात्मकत्वम्।

रसयन्

<u>रसयन्</u>—रसाकारवृत्तिसाक्षिस्वरूपः। तेन साक्षिमात्रं प्रकृते रसयन्नितिपदेन लक्ष्यते।

रसयितरसयतिः

रसयितृरसयतिः—तत्र रसयतिशब्देन मधुरादिरसविषया अन्तःकरणवृत्तिरुच्यते। अत्र तु रसयितुः स्वरूपभूता साक्षिस्वरूपा रसयतिरुच्यते।

रातिर्दातुः परायणम्

रातिर्दातुः परायणम्—रातेर्धनस्य दातुः परायणं प्राप्यस्थानं।

रुक्मवर्णः

रुक्मवर्णः—स्वयञ्ज्योतिःस्वभावः।

रुद्रः

रुद्रः—रोदयति संहारकाले प्रजाः संहरन्निति रुद्रः। रोदेर्णिलुक्चेति रक्प्रत्ययः णिचो लुक्च। रुदं दुःखं दुःखहेतुं वा द्रावयति नाशयतीति वा रुद्रः।

७००

रेतसि निष्ठन्

रेतसि तिष्ठन्। स्पष्टम्।

रेतसोऽन्तरः

। **रेतसोऽन्तरः**। स्पष्टम्।

लोकः

लोकः—लोक्यते अनुभूयते स्वात्मत्वेन योगिभिरिति लोकः।

लोकपालः

लोकपालः अत्र लोकपालशब्देन लोकानां जनानां मातृवत् पालक इत्युच्यते।

लोकाधिपतिः

लोकाधिपतिः। तेषामेव अधिष्ठाय पालयिता पितृवत् शिक्षक इत्युच्यते ।

लोकेभ्योज्यायान्

लोकेभ्यो ज्यायान्—महत्तरः सर्वव्यापीत्यर्थः ।

७०६

लोकेशः

राजवत् स्वामीत्युच्यते ।

वक्ता

वक्ता—वागिन्द्रियप्रेरयिता । यो वाचमन्तरो यमयतीति श्रुत्यन्तरात् । ननु वागादीन्द्रियप्रेरकः अन्तःकरणोपाधिको जीव एव प्रतीयते, कथं परमात्मा । नैतदेवम् । वागाद्युपाधिव्यतिरिक्तचैतन्यमेवात्र विवक्षितम् ।

वक्तुर्वक्तिः

वक्तुर्वक्तिः—अभिवदनक्रियानिर्वर्तनयोग्यस्वरूपम् ।

वदन्

वदन्—अभिवदनक्रियानिर्वर्तनयोग्यचैतन्यस्वभावः ।

७१०

वरदः

वरदः—भक्तानामिष्टप्रदः ।

वरिष्ठम्

वरिष्ठं-श्रेष्ठम् ।

वरेण्यः

वरेण्यः—वरणीयः, प्रार्थनीयः, सर्वप्राणिभिरात्मत्वेन सेव्य इत्यर्थः ।

वशी

वशी—सर्वमस्य वशे वर्तते इति वशी ।

वसुदानः

वसुदानः—वसु धनं सर्वप्राणिकर्मफलं । तस्य कर्मफलस्य दाता, प्राणिनां यथावत् कर्म- फलेन योजयितेत्यर्थः ।

वसुरण्यः

वसुरण्यः— वसुनः वरिष्ठस्य ज्ञानस्य ब्रह्मभावलक्षणस्य रणयिता ।

वागवत्

वागवत्—वाक्-वेदराशिः तं स्वसत्तया अवतीति वागवत् ।

वाचोद्रष्टा

वाचो द्रष्टा— वागिन्द्रियव्यापारस्य द्रष्टा । अनेन वागिन्द्रियविलक्षणत्वमुक्तं भवति ।

अत एवोक्तं श्रुत्या "ततस्सर्वस्मादस्मादन्यो विलक्षणः" इति ।

वाचस्साक्षी

वाचस्साक्षी—अनेन वागन्यत्वे सति अविक्रियत्वमप्युक्तं भवति ।

वाचाऽनभ्युदितम्

वाचाऽनभ्युदितम्—वाचा पदत्वेन परिच्छिन्नया करणगुणवत्या अनभ्युदितम्- प्रकाशितम्।

७२०

वाचितिष्ठन्

वायौ तिष्ठन्। वायोरन्तरः। वाचि तिष्ठन्। वाचोऽन्तरः। विज्ञाने तिष्ठन्। विज्ञा- नादन्तरः। स्पष्टम्।

वाचोऽन्तरः

स्पष्टम्।

वाचो वाक्

वाचो वाक्—स्वात्मन्यध्यस्तं वागिन्द्रियमनुप्राप्य तस्य स्वसमवधानेन अभिवदनसामर्थ्य- रूपं वाक्त्वं प्रयच्छतीति वाचो वाक्।

वामदेवः

वामदेवः—वामः वननीयः संभजनीयः स चासौ देवश्च वामदेवः। मुमुक्षुभिः प्रत्य-

वामनः

वामनः—वननीयः संभजनीयः।

वामनीः

वामनीः—वामानि-पुण्यकर्मफलानि पुण्यानुरूपं प्राणिभ्यो नयतीति वामनीः।

वायुरम्

वायुरम्—वायुरस्मिन् रमत इति वायुरम्।

वायोरन्तरः

स्पष्टम्।

वायौतिष्ठन्

स्पष्टम् ।

वालाग्रमात्रः

वालाग्रमात्रः—वालाग्रवदतिसूक्ष्मः । अतिसूक्ष्मदहराकाशे उपलभ्यमानत्वात् ।

७३०

वासुदेवः

वासुदेवः—वसति वासयति आच्छादयति वा सर्वमिति वासुः । दीव्यति क्रीडति विजिगीषति व्यवहरति द्योतते स्तूयते गच्छतीति वा देवः । वासुश्चासौ देवश्चेति वासुदेवः ।

विजरः

विजरः । विमृत्युः । विशोकः । विजिघत्सः । विजरः--विगतजरः । विमृत्युः—मृत्यु-रहितः । विशोकः—विगतशोकः । शोको नाम इष्टवियोगादिनिमित्तो मानसःसन्तापः । विजिघ-

विजानतामविज्ञातम्

विजानतामविज्ञातम्—सम्यग्जानतां-तद्ब्रह्मवयञ्जानीम इति बुद्धिवृत्तिविशिष्टरूपेण जानतां अविज्ञातं-अनवगतम् ।

विजानन्

विजानन्—बुद्धिवृत्तिप्रकाशनयोग्यसाक्षिस्वरूपः ।

विजिज्ञासितव्यः

विजिज्ञासितव्यः—शास्त्राचार्याभ्यामन्विष्य साक्षात्करणीय इत्यर्थः ।

विजिघत्सः

-विगताशनेच्छः ।

विज्ञाता

विज्ञाता—अलुप्तविज्ञानशक्तिः ।

विज्ञातुर्विज्ञातिः

विज्ञातुर्विज्ञातिः—विज्ञानवृत्तिकर्तुर्या स्वरूपभूता नित्यविज्ञप्तिः ।

विज्ञातेर्विज्ञाता

विज्ञातेर्विज्ञाता—विज्ञातेः केवलाया बुद्धिवृत्तेर्व्याप्ता स्वरूपप्रकाशेन भासकः ।

विज्ञानम्

विज्ञानम्—विज्ञप्तिस्वरूपम् ।

७४०

विज्ञानघनः

विज्ञानघनः—यथा सैन्धवखण्डः अन्तर्बहिश्च रसात्मनाऽवतिष्ठते । एवमात्मापि अन्तर्बहिश्च सर्वत्र विज्ञेयविनिर्मुक्तविज्ञानैकस्वरूपतया अवतिष्ठते । ८

विज्ञानादन्तरः

स्पष्टम् । विज्ञानशब्देन शारीर उच्यते, तस्य विज्ञानोपाधिकत्वेन विज्ञानमयत्वात् ।

विज्ञानात् परम्

विज्ञानात् परम् । बुद्धिस्वरूपात् विज्ञानात् परमुत्कृष्टम् । बुद्धेर्जडत्वेन आत्मनः स्वप्रकाशत्वेन उत्कृष्टत्वम् ।

विज्ञाने तिष्ठन्

स्पष्टम् । विज्ञानशब्देन शारीर उच्यते, तस्य विज्ञानोपाधिकत्वेन विज्ञानमयत्वात् ।

विज्ञेयः

विज्ञेयः—श्रवणमननादिभिर्ज्ञातुं योग्यः।

वित्तात् प्रेयः

वित्तात् प्रेयः। गवादिवित्तात् प्रियतरम्।

विदितम्

विदितम्—स्वयंप्रकाशमानम्।

विदितादन्यत्

विदितादन्यत्—

विदितं विदिक्रियाकर्मभूतं कार्यमात्रमित्यर्थः, तस्मादन्यत्।

विदिताविदितात्परः

विदिताविदितात्परः—विदितात्परत्वं अविषयत्वात् अविदितात्परत्वं स्वप्रकाशचिद्रूप-

विद्युत्पुरुषः

विद्युत्पुरुषः—विद्योतमानः देदीप्यमानः स्वयम्प्रकाश इति यावत्। पुरुषः पूर्णश्चिद्रूप आत्मेत्यर्थः।

७५०

विद्युमत्

विद्युमत्—प्रकाशवत्।

विधर्ता

विधर्ता—विविधं धारयिता प्रजानाम्।

विधरणः

विधरणः—वर्णाश्रमादिव्यवस्थायाः विधारयिता ।

विधाता

विधाता—निर्माता श्रेयःकर्ता वा।

विधृतिः

विधृतिः—विधारणः, वर्णाश्रमाचारादिमर्यादापालक इत्यर्थः।

विपश्चित्

विपश्चित्—अविपरिलुप्तचैतन्यस्वभावः।

विप्रः

विप्रः—विशेषेण व्याप्तः ।

विभुः

विभुः—व्यापकः, हिरण्यगर्भादिरूपेण विविधं भवतीति वा विभुः । सर्वात्मेति यावत् ।

विमुक्तः

विमुक्तः—सर्वदा अज्ञानतत्कार्यासंस्पृष्टः, मुक्तस्वरूप एव।

विमृत्युः

विमृत्युः—मृत्यु- रहितः।

७६०

विरजम्

विरजम्—निर्मलम्।

विरूपाक्षम्

विरूपाक्षम्— विषमलोचनम् ।…………तापरं ब्रह्मेत्यर्थः ।

विविक्तरूपः

विविक्तरूपः—पृथग्रूपः बुद्ध्यादिभ्यः।

विशदः

विशदः—निर्मलः ।

विशोकः

विशोकः—विगतशोकः। शोको नाम इष्टवियोगादिनिमित्तो मानसःसन्तापः।

विश्वम्

विश्वम्—विश्वस्य जगतः कारणत्वेन विश्वं ब्रह्मेत्युच्यते। यद्वा परमात्मनो न भिन्नमिदं विश्वं परमार्थतः, तेन विश्वमित्यभिधीयते ब्रह्म। ब्रह्मैवेदं विश्वमिदं वरिष्ठं पुरुष एवेदं सर्वमिति श्रुतेः तद्भिन्नं न किञ्चित् परमार्थतःसदस्ति। अथवा विशतीति विश्वं ब्रह्म।

विश्वकर्मा

विश्वकर्मा—सर्वस्रष्टा।

विश्वकृत्

विश्वकृत्—विश्वं करोतीति विश्वकृत्।

विश्वतश्चक्षुः

विश्वतो मुखः विश्वतश्चक्षुः । विश्वतोहस्तः । विश्वतस्पात्। विश्वतः—विश्वत्र सर्वत्र सर्वप्राणिषु ब्रह्मादिपिपीलिकान्तेषु विद्यमानानि मुखानि यस्य सः विश्वतोमुखः। एवमुत्तर-

विश्वतः परमः

विश्वतः परमः—विश्वतः—ब्रह्मादेरपि परमः—उत्कृष्टः ।

७७०

विश्वतस्पात्

पूर्वोक्तम्-----→ विश्वतश्चक्षुः

विश्वतो बाहुः

विश्वतोबाहुः—उक्तार्थमेतत् ।

विश्वतो मुखः

पूर्वोक्तम्-----→ विश्वतश्चक्षुः

विश्वतोहस्तः

पूर्वोक्तम्-----→ विश्वतश्चक्षुः

विश्वधाम

विश्वधाम—विश्वस्याधारभूतम् ।

विश्वभुक्

विश्वभुक्—कल्पान्ते विश्वस्य भोक्ता । यद्वा यदस्मदादिभिर्भुज्यते तदपि विश्वं स एव भुङ्क्ते इति ।

विश्वयोनिः

विश्वयोनिः—प्रपञ्चकारणम् ।

विश्वरूपः

विश्वरूपः— विश्वत्वेन स्थितं रूपं यस्य, जगदनुग्रहार्थं विश्वरूपतां दधातीत्यर्थः। ः

विश्ववित्

विश्ववित्—विश्वं वेत्तीति विश्ववित् ।

विश्वशम्भुः

विश्वशंभुः—विश्वेषां-सर्वेषां शं-सुखं तस्य भावयिता प्रतिपादयिता । एतस्यैवानन्द-स्यान्यानि भूतानि मात्रामुपजीवन्तीति श्रुतेः ।

७८०

विश्वस्य परिवेष्टिता

विश्वस्य परिवेष्टिता—सर्वमन्तःकृत्वा स्वात्मना सर्वं व्याप्यावस्थितः ।

विश्वस्य स्रष्टा

विश्वस्य स्रष्टा—प्रपञ्चकर्ता ।

विश्वस्यायतनम्

विश्वस्यायतनम्—स्पष्टम् ।

विश्वात्मा

विश्वात्मा— विश्वमेवात्मा शरीरं यस्य स विश्वात्मा ।

विश्वाधिकः

विश्वाधिकः—विश्वमधिकारिवर्गं मायातत्कार्यञ्चातिक्रम्य स्थितः । अतः दुःखासंस्पृष्ट- निरवधिकसुखस्वरूपः ।

विश्वाधिपः

विश्वाधिपः—विश्वस्याधिपतिः स्वामी ।

विश्वाक्षः

विश्वाक्षः—विश्वत्र सर्वत्र अक्षिकार्यवान् । सर्वदृक् इति यावत् । अथवा विश्वानि-सर्वाणि अक्षीणि प्रजासंबन्धीनि इन्द्रियाणि अस्याक्षीणि इन्द्रियाणीति विश्वाक्षः' ।

विष्णुः

विष्णुः—विषेः व्याप्त्यभिधायिनः ष्णुप्रत्ययान्तस्य रूपम् ।

वीरः

वीरः—परिभवासहः ।

वृषभः

वृषभः—वर्षत्येष भक्तेभ्यः कामान् इति वृषभः ।

७९०

वृक्षकालाकृतिभिः परः

वृक्षकालाकृतिभिः परः—वृक्षाकारेभ्यः कालाकारेभ्यः परः वृक्षकालाकृतिभ्यः परः । वृक्षः संसारवृक्षः । उक्तञ्च ' ऊर्ध्वमूलोऽवाक्शाख एषोऽश्वत्थस्सनातनः इति । परः - अन्यः प्रपञ्चा- संस्पृष्ट इत्यर्थः ।

वेदगुह्योपनिषत्सु गूढम्

वेदगुह्योपनिषत्सु गूढम् । वेदानां गुह्योपनिषदः वेदगुह्योपनिषदः तासु गूढं संवृतम् ।

वेदपुरुषः

वेदपुरुषः—वेदप्रतिपाद्यः पुरुषो वेदपुरुषः ।

वेदवित्

वेदवित्—वेदानां साङ्गानां सर्वविद्यास्थानानां वेत्ता।

वेदान्तकृत्

वेदान्तकृत्—व्यासरूपेण वेदान्तशास्त्रकृत्।

वेदितव्यः

वेदितव्यः—श्रवणादिसाधनैरनुभवारूढतामापादनीयः।

वेदैर्वेद्यः

वेदैर्वेद्यः—ऋग्वेदादिभिः वेद्यः प्रतिपाद्यः।

वैद्युतम्

वैद्युतम्—सर्वं प्रपञ्चजातं विद्योतयतीति वैद्युतम्।

वैश्वानरः

वैश्वानरः—विश्वान्नरान्नयति पुण्यपानुरूपां गतिं सर्वात्मा एष ईश्वरो वैश्वानरः। विश्वश्चायन्नरश्च वैश्वानरः। सर्वात्मत्वात्। विश्वैर्वा नरैः प्रत्यगात्मतया प्रविभज्य नीयत इति वैश्वानरः। विश्वेषां वा अयं नरः तद्विकारभूतत्वात् विश्वप्रपञ्चस्य। विश्वे वा नरा जीवात्मानः अस्य तादात्म्येनेति। ननु वैश्वानरशब्दस्य जाठरेऽग्नौ भूताग्नौ देवाग्नौ च, अयमग्निर्वैश्वानरो योऽयमन्तः पुरुषे येनेदमन्नं पच्यत इति, विश्वस्मा अग्निं भुवनाय देवा वैश्वानरं केतुमह्नामकृण्वन्निति, वैश्वानरस्य सुमतौ स्याम राजा हि कं भुवनानामभिश्रीरिति च रूढ्या प्रयोगदर्शनात् कथं यौगिकव्युत्पत्त्या परमात्मपरत्ववर्णनम्। को न आत्मा किं ब्रह्मेत्युपक्रमादिपर्यालोचनादिति गृहाण। तदुक्तं सूत्रकारैः— वैश्वानरः साधारणशब्दविशेषादिति।

व्यापकः

व्यापकः—परिपूर्णः।

८००

व्याप्तः

व्याप्तः— सर्वव्यापक इत्यर्थः ।

व्याप्ततमः

व्याप्ततमः—आकाशादयः पदार्थाः व्याप्ताः, ततोऽपि व्याप्ततमः ।

व्यापी

व्योमनि प्रतिष्ठितः

व्योमनि प्रतिष्ठितः हृदयाकाशे प्रतिष्ठितः ।

८०४

व्रीहेरणीयान्

व्रीहेरणीयान्—व्रीहेर्धान्यविशेषादणीयान् अणुतरः। ननु नित्यं विभुं सर्वगतमित्यादिना आत्मनः व्यापित्वश्रवणात् इहापि ज्यायान् पृथिव्या इत्यादिना आत्मनो व्यापित्वश्रवणाच्च कथमात्मनस्सूक्ष्मत्वमुच्यत इति चेत् औपाधिकत्वादिति ब्रूमः। तथाहि-हृदयसुषिरे तदाधारान्तःकरणे उपासकैरणीयस्त्वगुणविशिष्टतया हृदयायतनत्वेन च तथा उपास्यते इति। तदुक्तं

शन्तमा

शन्तमा—निरतिशयानन्दरूपा शिवस्य स्वरूपभूता ।

शम्भुः

शंभुः—शं सुखं भक्तानां भावयतीति शंभुः ।

शयानः

शयानः—निष्क्रियः ।

शर्वः

शर्वः—शृणाति सर्वाः प्रजास्संहारसमये इति शर्वः। शृणाति असुरान् भक्तानाञ्च पापमिति शर्वः।

शान्तम्

शान्तम्—सर्वविकारशून्यम्।

८१०

शान्त आत्मा

शान्त आत्मा—शान्तः—प्रत्यस्तमिताशेषविशेषरूपः, निर्विकारः सर्वान्तरः साक्षी चिन्मात्ररूपः आत्मा-निरुपचरितप्रत्यगात्मेत्यर्थः।

शाश्वतः

शाश्वतः—सर्वेषु कालेषु भवतीति शाश्वतः।

शाश्वतीशान्तिः

शाश्वती शान्तिः—नित्योपरतिरूपा। नित्यमुक्तं ब्रह्मेत्यर्थः।

शाश्वतं सुखम्

शाश्वतं सुखम्—सुखं द्विविधं नित्यमनित्यञ्चेति। तत्र यत् शब्दस्पर्शादिविषययोगजं सुखं तदनित्यं शुभकर्मोपस्थापितबुद्धिवृत्त्यनुविधायित्वेन तस्य क्षणिकत्वात्। यत्तु पुनः स्वरूप-सुखं तन्निरतिशयं शाश्वतमित्यर्थः। तदुक्तं **वासिष्ठे**—

शिवः

शिवः—मंगलस्वरूपः, अवस्थात्रयविनिर्मुक्तः। नामस्मृतिमात्रेण सर्वेषां पावनत्वाद्वा शिवः।

शिवङ्करः

शिवङ्करः—मङ्गळकरः।

शिवरूपम्

शिवरूप— सर्वदुःखविनिर्मुक्तपरमानन्दघनस्वभावमित्यर्थः।

शिवा तनूः

शिवा तनूः—शिवा - अविद्यातत्कार्यविनिर्मुक्तचैतन्यस्वरूपेत्यर्थः।

शुक्रम्

शुक्रम्—ज्योतिष्मत्, दीप्तमित्यर्थः।

शुक्लम्

शुक्लम्—अविद्यातत्कार्यविनिर्मुक्तम्।

८२०

शुद्धम्

शुद्धम्—निर्मलं, सत्वादिमलरहितमित्यर्थः।

शुभ्रम्

शुभ्रम्—प्रकाशस्वरूपम्।

शून्यम्

शून्यम्—पारतन्त्र्यादिदोषरहितं निर्विशेषं वा।

शूरः

शूरः—प्रलये सर्वसंहारसमर्थः।

श्रृङ्गः

श्रृङ्गः—छन्दसामृषभस्य प्रणवस्य श्रृंगः, अंशः, अकारः, अकारार्थः, प्रत्यगात्मेत्यर्थः।

श‍ृङ्गार्धम्

शृङ्गार्धम्—छन्दसामृषभस्य प्रणवस्य उकारस्याप्यवयवत्वात् शृंगशब्देन उकार उच्यते। शृङ्गार्धं इति उकारपूर्वार्धः। तदर्धभूतं ब्रह्मेत्यर्थः।

शृण्वन्

शृण्वन्—शब्दविषयवृत्तिप्रकाशनं कुर्वन्।

शोकान्तरम्

शोकान्तरम्—शोकरहितम्। निर्मृष्टनिखिलदुःखमित्यर्थः।

श्रुतेः श्रोता

श्रुतेः श्रोता—श्रुतिः श्रोत्रेन्द्रियजन्यशब्दादिविषयकमनोवृत्तिरूपा। तद्व्याप्ता तत्साक्षीति यावत्।

श्रेयः

श्रेयः—अनपायिसुखावाप्तिलक्षणं श्रेयः। तच्च तस्यैव ब्रह्मणो रूपमिति ब्रह्मैव श्रेयः।

८३०

श्रेष्ठः

श्रेष्ठः—अतिशयेन प्रशस्यः सर्वोत्कृष्टः सर्वेश्वर इति यावत्।

श्रोतव्यः

श्रोतव्यः—शब्दशक्तितात्पर्यानुसन्धानपूर्वकं वाक्यार्थज्ञानेन विषयीकर्तव्यः।

श्रोतुः श्रुतिः

श्रोतुः श्रुतिः—श्रोतुः शब्दविषयश्रोत्रजन्यमनोवृत्तिप्रकाशकस्य परमात्मनः स्वरूपभूता श्रुतिः।

श्रोत्रस्य द्रष्टा

श्रोत्रस्य द्रष्टा। स्पष्टम्।

श्रोत्रस्य श्रोत्रम्

श्रोत्रस्य श्रोत्रम्—श्रोत्रं तावदितरप्रपञ्चवत् दृश्यत्वात् सर्वाधिष्ठानभूते सच्चिन्मात्रे आत्मन्यध्यस्तमित्यविवादम्। तच्च श्रूयते अनेनेति व्युत्पत्त्या श्रवणसाधनमिन्द्रियम्। अधिष्ठानत्वेन तदनुप्रविश्य स्वप्रकाशचिद्रूपः परशिवः तस्य श्रोत्रत्वं-श्रवणसामर्थ्यं प्रयच्छति। सर्वान्तरस्वप्रकाशात्मचैतन्यज्योतिस्समवधानेन हि तत् स्वविषयशब्दाभिव्यञ्जनसमर्थं भवति। अतः श्रोत्रस्यापि श्रवणसामर्थ्यप्रदानात् तथाविधं सर्वान्तरं चैतन्यमेव श्रोत्रस्य श्रोत्रमित्यर्थः। **श्रोत्रस्य श्रोत्रं**

श्रोत्रस्य साक्षी

श्रोत्रस्य साक्षी। स्पष्टम्।

श्रोत्रादन्तरः

श्रोत्रे तिष्ठन्। श्रोत्रादन्तरः। श्रोत्रेन्द्रियस्याधिष्ठानतया वर्तमानः। श्रोत्रेन्द्रियस्य

८३७

श्रोत्रे तिष्ठन्

पूर्वोक्तम्-----→ श्रोत्रादन्तरः

षोडशकलः

षोडशकलः—षोडशसंख्याकाः कलाः अवयवा इवात्मनि अविद्याध्यारोपितरूपाः यस्मिन् पुरुषे सोऽयं षोडशकलः।

८३९

षोडशान्तः

षोडशान्तः—षोडशो विकारः— पञ्चभूतान्येकादशेन्द्रियाणि अन्तः—अवसानं विस्तरः समाप्तिर्वा यस्यात्मनः स षोडशान्तः। अथवा प्रश्नोपनिषदि यस्मिन्नेताष्षोडशकलाः प्रभवन्तीत्यारभ्य सप्राणमसृजतप्राणाच्छ्रद्धामित्यादिनामान्ताष्षोडशकलाः अवसानं यस्येति स षोडशान्तः।

८४०

सकृद्विभातः

सकृद्विभातः—सदा विभातः। सर्वदा प्रकाशैकस्वरूपः इत्यर्थः।

सच्चिदानन्दघनम्

सच्चिदानन्दघनम्—सत्पदेन कालत्रयाबाध्यं स्वरूपमुच्यते, चित्पदेन प्रकाशान्तरनिरपेक्षतया प्रकाशमानत्वं, आनन्दपदेन निरतिशयप्रेमास्पदतया सुखस्वरूपत्वं, घनशब्दस्तेषामेव सदादीनां विशेषं बोधयति। तथाहि-सतस्सर्वकार्याधिष्ठानतां, प्रतिबिंबचैतन्यभूतानां सर्वेषां जीवात्मनां बिंबभूतचैतन्यात्मकत्वञ्चैतन्यस्य, ब्रह्मादिस्थावरान्तानामानन्दानामभिन्नतयाऽवस्थितत्व मानन्दस्य, बोधयति। अनेन कारणात्मकं ब्रह्म प्रतिपादितं भवति।

सच्चिदानन्दपूर्णात्मा

सच्चिदानन्दपूर्णात्मा—सत् कालत्रयाबाध्यं, चित् प्रमाणान्तरनैरपेक्ष्येण सर्वदृश्यप्रकाशकतया प्रकाशमानं, आनन्दः निर्मृष्टनिखिलदुःखानुषंगसुखरूपः, पूर्णः-सर्वव्यापी आत्मा देहेन्द्रियमनोबुध्यादिरूपादनात्मवर्गात् विलक्षणः प्रत्यग्रूपः। अनेन अनृतजडदुःखपरिच्छिन्नानात्मभ्यो विलक्षणः अखण्डैकरसः आत्मेत्युक्तं भवति। अत्र यद्यपि सदेवसोम्येदमित्यत्र सद्रूपेण अत्रायं पुरुषः स्वयञ्ज्योतिरित्यत्र चिद्रूपेण विज्ञानमानन्दं ब्रह्मेत्यत्र आनन्दरूपेण पूर्णमदः पूर्णमिदमित्यत्र पूर्णरूपेण आत्मा वा इदमेक एवाग्र आसीत् इत्यत्र आत्मरूपेण पृथक् पृथक् प्रतिपादितः, न तु सच्चिदानन्दादिरूपेण; तथापि सच्चिदानन्दपरिपूर्ण एवात्मेति प्रतिपादयितुं श्रुत्या लाघवात् सदादिरूपेण प्रतिपादितम्।

सच्चिदानन्दमात्रः

सर्वद्रष्टा । सर्वसाक्षी । सर्वग्रासः । सर्वप्रेमास्पदः । सच्चिदानन्दमात्रः । द्रष्टदृश्यान्वयव्यतिरेकेण चिद्रूपत्वं साधयति श्रुतिः—सर्वद्रष्टारमिति । द्रष्टत्वं नाम दर्शनकर्तृत्वं, अतः कथं चिन्मात्रत्वमित्याशङ्क्य साक्षिसाक्ष्यान्वयव्यतिरेकेण सर्वविक्रियानिरासेन चिन्मात्ररूपत्वमाह-सर्वसाक्षिणमिति । साक्षात्क्रियाव्यवधानमन्तरेण स्वात्मनैव सर्वमीक्षत इति साक्षी, ततः चिन्मात्ररूपत्वम् । अथ साक्षिणस्साक्ष्यसद्भावेन प्राप्तं सद्वितीयत्वं परिहरन् सद्रूपत्वमानन्त्यञ्च आगमापायितदवध्यन्वयव्यतिरेकेणाह-सर्वग्रासमिति । आगमापायवतां कल्पितानां जाग्रदादीनां साक्ष्यरूपाणां सर्वकल्पनाधिष्ठानादिरूपसच्चिन्मात्रव्यतिरेकेणासत्वात् सर्वसंहर्तारमित्यर्थः । अथास्य पुरुषार्थरूपत्वाय दुःखिप्रेमास्पदान्वयव्यतिरेकमाश्रित्य परमानन्दरूपत्वमाह-सर्वप्रेमास्पद इति । परमप्रेमास्पदत्वात् परमानन्दरूपमित्यर्थः । अथ अन्वयव्यतिरेकचतुष्टयसिद्धं फलमाह-सच्चिदानन्दमात्रमेकरसमिति । मात्रपदं प्रत्येकं संबन्धनीयं सन्मात्रं चिन्मात्रं आनन्दमात्रमिति । सदादिषु स्वगभेदनिरासाय सदादीनम्परस्परभेदाभावादेकरसमित्युक्तं श्रुतौ । अत्र परमेश्वरस्य सर्वसाक्षित्वमुक्तं **श्रीविष्णुपुराणे**—

सच्चिदानन्दरूपः

सत्

सत्—अस्तितामात्रं वस्तु सूक्ष्मं निर्विशेषं सर्वगतमेकं निरञ्जनं निरवयवं यदवगम्यते सर्ववेदान्तेभ्यः तत् सदित्युच्यते ।

सत्यकामः

सत्यकामः—सत्या अवितथाः कामा यस्य सोऽयं सत्यकामः । वितथा हि संसारिणां कामाः, ईश्वरस्तु तद्विपरीतः । अप्रतिहतकाम इत्यर्थः ।

सत्यम्

सत्यम्—कालत्रयेऽपि बाधशून्यम् ।

सत्यसङ्कल्पः

सत्यसङ्कल्पः—सत्याः-अवितथाः संकल्पा यस्य सोऽयं सत्यसंकल्पः । न संसारिणामिव अनैकान्तिकफलः संकल्पः ईश्वरस्य । संसारिणो हि अनृतेन मिथ्याफलहेतुना प्रत्यूढत्वात् संकल्पस्य मिथ्याफलत्वम् ।

सत्यस्य सत्यम्

सत्यस्य सत्यम्—सत्यस्य—पाञ्चभौतिककार्यकरणात्मकस्य संघातस्य बाह्यगिरिनदीस-मुद्रादेश्च व्यावहारिकसत्यस्य अधिष्ठानभूतमात्यन्तिकं पारमार्थिकसत्यं ब्रह्मेत्यर्थः।

८५०

सत्यस्वरूपः

सत्यस्वरूपः—अध्यस्तसकलदृश्याधिष्ठानतया स्वयं पारमार्थिकसद्रूपः।

सत्येन लभ्यः

सत्येन लभ्यः—सत्येन—नित्यं मृषावदनपरित्यागेन लभ्यः-प्राप्तव्यः।

सत्वस्य प्रवर्तकः

सत्वस्य प्रवर्तकः—सत्वस्य-अन्तःकरणस्य प्रवर्तकः-प्रेरयिता ।

सदसत्

सदसत्—सदसत्स्वरूपं, सदसतोर्मूर्तामूर्तयोः स्थूलसूक्ष्मयोः तद्व्यतिरेकेणाभावात् । अस्तिनास्तिस्वरूपं वा व्यक्ताव्यक्तापरपर्यायकार्यकारणरूपमिति वा ।

सदसद्विहीनम्

सदसद्विहीनम्—कार्यकारणरहितम् ।

सदसस्पतिः

सदसस्पतिः—सीदन्त्यस्मिन् सर्वे विकारा इति सदः प्रेयसीस्थानीया सर्वविकारहेतु, परा प्रकृतिः, तस्याः पतिः-पाता नित्यं संश्लिष्टो भर्ता परमेश्वर इत्यर्थः। तथा चोक्तमभियुक्तैः—

सदानन्दचिन्मात्रः

सदानन्दचिन्मात्रः—स्पष्टम्।

सदानन्दम्

सदानन्दम्—सर्वदा निर्मृष्टनिखिलदु:खानुषंगपरमानन्दस्वरूपं कालत्रयाबाध्यपर- मानन्दस्वरूपं वा ।

सदाशिवः

सदाशिवः—कैवल्यात्मा नित्यकल्याणरूपः महेश्वरः, निर्मृष्टनिखिलदु:खानुषंगपरमानन्द-
रूप इत्यर्थः । तदुक्तं ब्रह्मगीतायाम्—

सदोज्वलः

सर्वसंहारसमर्थः । सदोज्वलः । स्वात्मबन्धहरः । सर्वदा द्वैतरहितः । सर्वाधिष्ठान

सन्मात्रः—अनुग्रादिनाम्नामर्थकथनावसरे एतानि नामानि व्याख्यातानि ।

८६०

सद्घनः

सद्घनः । आकाशादिप्रपञ्चस्य स्वतस्सत्तानिराकरणपुरस्सरं अध्यस्तसर्वाधिष्ठानतया पार-
मार्थिकं कालत्रयाबाधितं सद्रूपं ब्रह्मेति पूर्वमेव वर्णितम् ।

सद्योजातः

सद्योजातः—यस्मात्परमेश्वरात् देवतिर्यङ्मनुष्याद्याः सद्य एव स्मरणमात्रात् जायन्ते

सनातनः

सनातनः—चिरन्तनः ।

सन्धाता

सन्धाता—कर्मफलैः पुरुषान् सन्धत्त इति सन्धाता । स्वस्मिन् परमात्मनि श्रवणादि- परान् योजयतीति वा सन्धाता ।

सन्निहितम्

सन्निहितम्—बुद्ध्यादेर्द्रष्टृत्वेन सदा समीपस्थम् ।

सन्मात्रः

सन्मात्रः—कालत्रयेऽपि स्वव्यतिरिक्तवस्त्वन्तरेणापरामृष्टः ।

सप्तात्मा

सप्तात्मा—अर्धमात्रासंबन्धित्वेनोक्तैः सोमलोकाद्यैः सप्तात्मेत्यर्थः ।

सबाह्याभ्यन्तरः

सबाह्याभ्यन्तरः—बाह्याभ्यन्तरेण सह वर्तत इति सबाह्याभ्यन्तरः । अध्यस्त

समः

समः—एकः ब्रह्मादिस्थावरान्तेषु ।

समस्तसाक्षी

समस्तसाक्षी—वियदादिभूतभौतिकस्य सर्वस्य जगतः साक्षी ।

८३०

समाधिः

समाधिः—अहं ब्रह्मास्मीत्येतद्बुद्धिसमाधिरूपः भेदशून्यः प्रत्यगभिन्नः परमात्मेत्यर्थः ।

सर्वः

सर्वः—सर्वस्वरूपः, क्षितिसलिलहुतवहपवनगगनहिमकरदिनमणियजमानात्मभिरष्टाभिर्मूर्तिभिस्सर्वं व्याप्य स्थितः ।

सर्वकर्मा

सर्वकर्मा—सर्वं विश्वं तेन ईश्वरेण क्रियत इति जगत्सर्वं कर्मास्येति सर्वकर्मा । स हि सर्वस्य कर्तेति श्रुतेः ।

सर्वकामः

सर्वकामः—सर्वे कामा दोषरहिता अस्येति सर्वकामः। धर्माविरुद्धो भूतेषु कामोऽस्मीति स्मृतेः। ननु कामोऽस्मीति वचनादिह बहुव्रीहिर्न भवति सर्वकाम इति। न—कामस्य कर्तव्यत्वात् शब्दादिवत् पारार्थ्यप्रसङ्गाच्च देवस्य। तस्माद्यथेह सर्वकाम इति बहुव्रीहिः तथा कामोऽस्मीति स्मृत्यर्थो वाच्यः।

सर्वगः

सर्वगः—अकाशवत् सर्वव्यापी।

सर्वगतः

सर्वगतः—आकाशवत् सर्वव्यापकः।

सर्वगन्धः

सर्वगन्धः—सर्वे गन्धाः सुखकरा अस्येति सोऽयं सर्वगन्धः। पुण्यो गन्धः पृथिव्यामिति स्मृतेः। अपुण्यगन्धग्रहणस्य पाप्मसंबन्धनिमित्तत्वश्रवणात्। तस्मात्तेनोभयं जिघ्रति सुरभि च दुर्गन्धि च पाप्मना ह्येष विद्ध इति श्रुतेः। न च पाप्मसंबन्ध ईश्वरस्य, अविद्यादिदोषानुपपत्तेः।

सर्वग्रासः

पूर्वोक्तम्----->सच्चिदानन्दमात्रः

सर्वजगद्धितम्

सर्वजगद्धितम्—सर्वस्य जगतो हितं परमप्रेमास्पदतया आनन्दरूपत्वात्।

सर्वज्ञः

सर्वज्ञः—सामान्यतस्सर्वं जानातीति सर्वज्ञः।

सर्वतः पाणिपादम्

सर्वतःपाणिपादम्—सर्वतः पाणयः पादाश्च अस्येति सर्वतःपाणिपादम् ।

सर्वतत्त्वैर्विशुद्धः

सर्वतत्त्वैर्विशुद्धः—सर्वतत्त्वै-अविद्यातत्कार्यैःविशुद्धः-असंस्पृष्टः ।

सर्वतोऽक्षिशिरोमुखम्

सर्वतोऽक्षिशिरोमुखम्—सर्वतोऽक्षीणि शिरांसि मुखानि च यस्य तत् सर्वतोऽक्षिशिरोमुखम्

सर्वतोमुखः

सर्वतोमुखः—सर्वप्राणिगतानि मुखान्यस्य इति सर्वतोमुखः ।

सर्वतः श्रुतिमत्

सर्वतश्श्रुतिमत्—पूर्ववत्

सर्वदा द्वैतरहितः

पूर्वोक्तम्----->सदोज्वलः

सर्वदेववेदयोनिः

सर्वदेववेदयोनिः—सर्वेषां देवान—ब्रह्मादीनां वसुरुद्रादित्यादीनाञ्च, वेदानामृग्यजु- स्सामादीनां, योनिः—कारणम् ।

सर्वद्रष्टा

पूर्वोक्तम्----->सच्चिदानन्दमात्रः

सर्वप्रेमास्पदः

<u>पूर्वोक्तम्-----→सच्चिदानन्दमात्रः</u>

सर्वभूतगुहाशयः

<u>सर्वभूतगुहाशयः</u>—सर्वेषां भूतानां गुहायां बुद्धौ शेत इति सर्वभूतगुहाशयः।

८९०

सर्वभूतदमनः

<u>सर्वभूतदमनः</u>—सर्वेषां भूतानां दमयिता-नियन्ता।

सर्वभूताधिवासः

<u>सर्वभूताधिवासः</u>—सर्वाणि भूतान्यात्मत्वेन अधिकृत्य वसतीति सर्वभूताधिवासः।

सर्वभूतानामीश्वरः

<u>सर्वभूतानामीश्वरः</u>—ब्रह्मादिसर्वभूतानामपि नियन्ता।

सर्वभूतान्तरात्मा

<u>सर्वभूतान्तरात्मा</u>—सर्ववस्तूनां स्वरूपभूत इत्यर्थः।

सर्वभूतस्थः

<u>सर्वभूतस्थः</u>—भूतभौतिकप्रपञ्चस्य प्रतिनाशावस्थायामपि सर्वत्र कारणत्वेनावस्थितः।

सर्वभूतेषु गूढः

<u>सर्वभूतेषु गूढः</u>-संवृतः।

सर्वमभ्याप्तः

<u>सर्वमभ्याप्तः</u>—सकलं जगदभिव्याप्तः। अततेर्धातोर्व्याप्त्यर्थस्य कर्तरि निष्ठा।

सर्वरसः

सर्वरसः—पूर्ववत् । रसोऽहमप्सु कौन्तेयेति स्मृतेः ।

सर्ववित्

सर्ववित्—विशेषतस्सर्वं वेत्तीति सर्ववित् । सर्वत्र सर्वं विन्दत इति वा ।

सर्वविद्यानामीशानः

सर्वविद्यानामीशानः—सकलविद्यानां नियन्ता, सर्वविद्याशरीरत्वात् । अत एव ब्रह्मादीनामप्यादिगुरुः परमेश्वरः ।

९००

सर्वव्यापी

सर्वव्यापी—आकाशवत् सर्वत्र व्याप्य वर्तमानः ।

सर्वसाक्षी

पूर्वोक्तम्----->सच्चिदानन्दमात्रः

सर्वसंस्थः

सर्वसंस्थः— सर्वेषां संस्था समाप्तिः प्रलयो यस्मिन्निति सर्वसंस्थः ।

सर्वसंहारसमर्थः

पूर्वोक्तम्----->सदोज्वलः

सर्वस्मादन्यः

सर्वस्मादन्यः—सर्वस्य द्रष्टृत्वादेव सर्वस्मात् दृश्यात् अन्यः - भिन्नः ।

सर्वस्मात्पुरतः सुविभातम्

सर्वस्मात् पुरतस्सुविभातं—यथा प्रपञ्चवैलक्षण्यमात्मनस्सच्चिदानन्दरूपत्वात् एवं सच्चिदादिशब्दवाच्यत्वात् सच्चिदानन्दस्वरूपेण आत्मनोऽनेकरूपता स्यात्, तन्निवृत्त्यर्थं अस्मात्सर्वस्मात्पुरतस्सुविभातनेकरसमेवेति। अस्मात्सच्चिदादिवाच्यभेदप्रत्ययात् पूर्वमेव सुविस्पष्टं एतद्भेदसाक्षित्वेन भातीति अनृतजडदुःखविरुद्ध आत्मा तथोक्तः। तस्मात् एकरसमेव आत्मस्वरूपमित्यर्थः।

सर्वस्मात् प्रियतमः

सर्वस्मात्प्रियतमः—सर्वस्मात् पुत्रमित्रादेश्चक्षुःश्रोत्रादेश्च प्रियतमः। तच्छेषत्वेन हि तेषां प्रियत्वं न स्वतः। आत्मनस्तु स्वत एव प्रियत्वम्। अतः प्रेमास्पदत्वात् परमानन्दरूपोऽयमात्मेत्यर्थः।

सर्वस्मात्प्रेयः

सर्वस्मात्प्रेयः—लोके प्रियत्वेन प्रसिद्धात् पुत्रवित्तादेः प्रेयः प्रियतरम्। **प्रेयोऽन्यस्मात्सर्वस्मा**दिति श्रुतिः।

सर्वस्माद्विलक्षणः

सर्वस्माद्विलक्षणः—अनृतजडदुःखरूपात् सर्वस्मात् दृश्याद्विलक्षणः, सच्चिदानन्दरूपत्वात्।

सर्वस्याधिपतिः

सर्वस्य वशी। सर्वस्येशानः। सर्वस्याधिपतिः—सर्वस्य-ब्रह्मेन्द्रादेः वशी, सर्वो ह्यस्य वशे वर्तते। न केवलं वशी, सर्वस्येशानः। ईशिता च ब्रह्मेन्द्रप्रभृतीनाम्। ईशितृत्वञ्च कदाचिज्जातिकृतं यथा राजकुमारस्य भृत्यान् प्रति, तच्च मा भूदित्याह - सर्वस्याधिपतिः अधिष्ठाय पालयिता, स्वतन्त्र इत्यर्थः। त्रयमप्येतद्वशित्वादि हेतुहेतुमद्रूपं, यस्मात्सर्वस्याधिपतिः ततोऽसौ सर्वस्येशानः। यो हि यमधिष्ठाय पालयति स तं प्रतीष्ट एवेति प्रसिद्धम्। यस्मात्सर्वस्येशानस्तस्मात्सर्वस्य वशी इति।

९१०

सर्वस्येशानः

पूर्वोक्तम्-----→ सर्वस्याधिपतिः

सर्वस्य कर्ता

सर्वस्य कर्ता—स्पष्टम्।

सर्वस्य द्रष्टा

सर्वस्य द्रष्टा—चक्षुरादिज्ञानेन्द्रियव्यापारस्य वागादिकर्मेन्द्रियव्यापारस्य प्राणमनोवृत्ती- नाञ्च अज्ञानवृत्तेश्च प्रकाशकः।

सर्वस्य पुरतः सुविभातम्

सर्वस्य पुरतः सुविभातम्—सर्वस्य-कार्यकारणात्मकप्रपञ्चस्य पूर्वमेव सुविभातं स्वय- म्प्रकाशत्वात्।

सर्वस्य प्रभुः

सर्वस्य प्रभुः—सर्वस्य जगतः प्रभुः।

सर्वस्य योनिः

सर्वस्य योनिः—सर्वकारणभूतः।

सर्वस्य लोकस्य वशी

सर्वस्य लोकस्य वशी—समस्तस्य ब्रह्मलोकादेः ब्रह्मादिस्तंबपर्यन्तस्य च वशी। सर्वमस्य वशे वर्तत इत्यर्थः।

सर्वस्य वशी

पूर्वोक्तम्-----→ सर्वस्याधिपतिः

सर्वस्य शरणम्

सर्वस्य शरणम्—परायणम्।

सर्वस्य साक्षी

सर्वस्य साक्षी—तथा च यस्त्वेतादृशं साक्षिणमात्मत्वेन जानाति स कर्मबन्धरहितो भवति।

१२०

सर्वाजीवः

सर्वाजीवः—सर्वेषामाजीवनमस्मिन्निति सर्वाजीवः।

सर्वात्मकः

सर्वात्मकः—चेतनाचेतनात्मकः।

सर्वात्मा

सर्वात्मा—सर्वानन्यः।

सर्वाधिष्ठानसन्मात्रः

पूर्वोक्तम्----->सदोज्वलः

सर्वाननशिरोग्रीवः

सर्वाननशिरोग्रीवः—सर्वाण्याननानि शिरांसि ग्रीवाश्चास्येति सर्वाननशिरोग्रीवः।

सर्वानुग्राहकः

सर्वानुग्राहकः—फलमुद्दिश्य कर्मानुष्ठानवतां भोगप्रदानेन ईश्वरार्पणबुद्ध्या कर्मानुष्ठानवतां श्रवणादिपराणाञ्च सत्वशुद्धिज्ञानोत्पत्तिद्वारा मोक्षप्रदानेन सर्वाननुगृह्णातीति सर्वानुग्राहकः।

सर्वानुभूः

सर्वानुभूः—सर्वात्मना सर्वमनुभवतीति सर्वानुभूः।

सर्वान्तरः

सर्वान्तरः—सर्वस्य बुद्ध्यादेरभ्यन्तरः।

सर्वेन्द्रियगुणाभासम्

सर्वेन्द्रियगुणाभासम्—सर्वाणि च इन्द्रियाणि श्रोत्रादीनि अन्तःकरणपर्यन्तानि सर्वेन्द्रियग्रहणेन गृह्यन्ते। अन्तःकरणबहिःकरणोपाधिभूतैस्सर्वेन्द्रियगुणैस्संकल्पाध्यवसायश्रवणादिभिर्युक्तवदवभासत इति सर्वेन्द्रियगुणाभासं, सर्वेन्द्रियैर्व्यापृतमिव तज्ज्ञेयमित्यर्थः। कस्मात्कारणात् व्यापृतमिव गृह्यत इति, आह—

सर्वेन्द्रियविवर्जितम्

सर्वेन्द्रियविवर्जितम्—सर्वकरणरहितमित्यर्थः।

९३०

सर्वेभ्यः पाप्मभ्यः उदितः

सर्वेभ्यः पाप्मभ्य उदितः—सर्वेभ्यो-धर्माधर्मरूपेभ्यः तत्कार्येभ्यश्च उदितः। असंस्पृष्ट इत्यर्थः।

सर्वेभ्यो भूतेभ्योऽन्तरः

सर्वेश्वरः

सर्वेश्वरः—सर्वस्य चेतनाचेतनात्मकस्य जगतः ईश्वरो नियन्ता।

सर्वैश्वर्यसम्पन्नः

सर्वैश्वर्यसंपन्नः—अणिमादिसमस्तैश्वर्यसंपन्नः।

सर्वेषां भूतानमधिपतिः

सर्वेषां भूतानामधिपतिः—सर्वेषां भूतानां स्वतन्त्रः।

सर्वेषां भूतानां राजा

सर्वेषां भूतानां राजा—उत्कृष्टः।

सर्वषु भूतेषु तिष्ठिन्

सर्वेषु भूतेषु तिष्ठन्—सर्वप्रत्यगात्मतया वर्तमानः।

सलिलः

सलिलः—सलिलवत् स्वच्छस्वभावः। सलिल इव सलिलः।

सविता

सविता—सवितृरूपेण जगदनुग्रहं कुर्वन् परमात्मा सवितेत्युच्यते। अथवा सर्वस्य जगतः प्रसविता जनयिता।

सवितुर्वरेण्यः

सवितुर्वरेण्यम्—सवितुस्सूर्यस्योपास्यम्। सवितुरित्युपलक्षणम्। सर्वप्राणिनामुपास्य मित्यर्थः।

९४०

सहस्रपात्

सहस्रपात्—सहस्राणि अनन्तानि सर्वप्राणिसंबन्धिनः पादाः चरणाः अस्येति सहस्रपात्।

सहस्राक्षः

सहस्राक्षः—सहस्राण्यस्य अपरिमितानि अक्षाणि इन्द्रियाण्यस्येति सहस्राक्षः।

सहस्रशीर्षा

सहस्रशीर्षा—सहस्राण्यनन्तानि शीर्षाण्यस्येति सहस्रशीर्षा।

सङ्कल्पाध्यवसायाभिमानलिङ्गम्

सङ्कल्पाध्यवसायाभिमानलिंगः—संकल्पो मनोवृत्तिः, अध्यवसायो बुद्धिवृत्तिः अभिमानोऽहंकारवृत्तिः, एते लिंगभूता यस्येति संकल्पाध्यवसायाभिमानलिंगः। नन्वेतेषामेवात्मत्वम्। मतान्तरे तु एते एवात्मानः। तथा हि लोकायतिकभेदाः केचित् मन एव आत्मेति मन्यन्ते। बौद्धास्तु बुद्धिरात्मेति। नैयायिकास्तु अहंकार एवात्मेति। अहंकारस्यापि सुषुप्त्यादिकाले सूक्ष्मरूपेण सत्त्वमंगीकुर्वन्ति। श्रुतिस्तु तेषामात्मत्वनिरसनार्थमेवमुक्तवती संकल्पाध्यवसायाभिमान लिंग इति। तदुक्तं **सूतसंहितायाम्**—

संभक्षः

संभक्षः—सम्यक्भक्षो यस्यासौ संभक्षः। अविद्यातत्कार्यभूतस्य प्रपञ्चस्य अधिष्ठानभूते स्वरूपे अन्तर्हितत्वादित्यर्थः।

संयद्वामः

संयद्वामः—संयद्वामशब्दं श्रुतिः स्वयमेव व्याकरोति—एतं हि सर्वाणि वामान्यभिसंयन्तीति। एतं यथोक्तं आत्मानं हि यस्मात् सर्वाणि वामानि वननीयानि संभजनीयानि शोभनानि अभिसंयन्ति अभिसंगच्छन्तीत्यतः संयद्वाम इत्यर्थः। **एतं संयद्वाम इत्याचक्षते** इति श्रुतिः।

संयोगनिमित्तहेतुः

संयोगनिमित्तहेतुः—सर्वस्य शरीरसंयोगनिमित्तानां अविद्यादीनां हेतुः कारणम्

संसारमोक्षस्थितिबन्धहेतुः

संसारमोक्षस्थितिबन्धहेतुः—संसारमोक्षस्थितिबन्धानां हेतुः कारणम्।

साक्षी

साक्षी—जाग्रदाद्यवस्थालक्षणस्य साक्ष्यस्य द्रष्टा साक्षी। प्रत्यक्चैतन्यरूपेण अवस्थित इत्यर्थः।

साम

साम—ब्रह्म, समत्वात्। सर्वानन्यरूपमित्यर्थः।

९५०

साङ्ख्ययोगाधिगम्यः

सांख्ययोगाधिगम्यः—सम्यग्ज्ञानं सांख्यं, तदेव योगः प्राप्यस्वीकरणोपायं, तेन सांख्य-योगेनाधिगम्यः प्राप्यः।

सिद्धम्

सिद्धम्-कार्यकारणात्मकप्रपञ्चस्य सर्वस्याध्यस्तस्याधिष्ठानतया प्रमाणान्तरनिरपेक्षतया अनादित्वात् कारणान्तरनिरपेक्षतया च स्वयंप्रकाशमानत्वात् पूर्वमेव सिद्धम्। **सिद्धं हि ब्रह्मे**ति श्रुतिः।

सिंहः

सिंहः— षीङ्बन्धन इति धातो रूपं सिं इति। कार्यकारणसंबन्धः स्वस्य सर्वदृश्य संबन्धो वा तदर्थः। तं संबन्धं तत्त्वमस्यादिवाक्यजन्यवृत्त्यारूढस्सन्नसौ परमेश्वरः हन्ति-नाशयति इति सिंह इत्युच्यते। ह इति हनहिंसागत्योरित्येतस्य रूपम। अत्र सिंहः पृषोदरादित्वात् साधुः।

सुकृतम्

सुकृतम्– यस्मादेव स्वयमेव कृतवत् तस्मात् तद्ब्रह्म सुकृतं स्वयंकर्तृ उच्यते। स्वयंकर्तृ ब्रह्मेति प्रसिद्धं लोके, सर्वकारणत्वात्। यस्माद्वा स्वयमेवाकरोत् सर्वं सर्वात्मना तस्मात् पुण्यरूपेणापि तदेव ब्रह्म कारणं सुकृतमुच्यते इति।

सुखम्

सुखम्—विषयेन्द्रियाद्यजन्यं निरायासमनाबाधं सुषुप्तिसमाध्यादावभिव्यक्तस्वरूपसुख- मित्यर्थः।

सुखरूपः

सुखरूपः—परमप्रेमास्पदत्वात् सुखरूपः।

सुनिर्मलाशान्तिः

सुनिर्मला शान्तिः—स्वरूपावस्थानलक्षणा सर्वदृश्यप्रपञ्चोपरमलक्षिता परमपदप्राप्ति रूपा।

सुवर्दृक्

सुवर्दृक्—सुवः-निरतिशयसुखं तस्मिन् दृक्-दर्शनं यस्य स सुवर्दृक्; स्वयंप्रकाशमाना- नन्दात्मेत्यर्थः।

सुविभातम्

सुविभातम्—स्पष्टम्।

सुविस्पष्टः

सुविस्पष्टः—स्वप्रकाशत्वात्।

सुसूक्ष्मम्

सुसूक्ष्मम्—सूक्ष्मभूताकाशादेरपि कारणत्वात् शब्दादिगुणाभावाच्च सुसूक्ष्मम् ।

सूक्ष्मम्

सूक्ष्मम्—अणुरूपं, दुःखगम्यमित्यर्थः ।

सूक्ष्मातिसूक्ष्मः

सूक्ष्मातिसूक्ष्मः—सूक्ष्मादाकाशादेरप्यतिसूक्ष्मः ।

सूक्ष्मात्सूक्ष्मतरम्

सूक्ष्मात्सूक्ष्मतरम्—सूक्ष्मादाकाशादेरपि तत् सूक्ष्मतरम्, निरतिशयं ह्यस्य सौक्ष्म्यं

सूत्रम्

सूत्रम्—सर्वजगत्पटारंभकम् ।

सूर्यस्य वर्चोदाः

सूर्यस्य वर्चोदाः—जगच्चक्षुषः जगत्प्रकाशनसामर्थ्यदाता ।

सेतुः

सेतुः—सेतुरिव सेतुः, मर्यादापालकः । एषां भूरादीनां कर्तृकर्मफलाश्रयाणां नियन्तेत्यर्थः ।

सोमः

सोमः—उमया ब्रह्मविद्यास्वरूपिण्या कात्यायन्या सह वर्तमानःसोमः ।

सोमलोकः

सोमलोकः—उमया ब्रह्मविषया सह वर्तत इति सोमः, लोकः—स्वयंप्रकाशः, सोमश्चासौ लोकश्चेति सोमलोकः।

सौम्यम्

सौम्यम्—सोमो भवानीपतिः, तेनानन्यत्सौम्यम्। प्रियदर्शनं वा, सुखरूपत्वात्।

९७०

स्पृशन्

स्पृशन्—त्वगिन्द्रियजन्यवृत्तिप्रकाशत्वाईः।

स्थानत्रयव्यतीतः

स्थानत्रयव्यतीतः—तिष्ठत्येतेष्वात्मेति जागरणादीनि स्थानानि, तेषां त्रयं त्रित्वसंख्या वैशिष्ट्यं तस्माद्व्यतीतो गतः। तुरीय इत्यर्थः।

स्थिरः

स्थिरः—सदा एकरूपत्वात् स्थिरः।

स्प्रष्टुः स्पृष्टिः

स्प्रष्टुः स्पृष्टिः—त्वगिन्द्रियेण घटादिसंबन्धे सति यदा घटादिविषयान्तःकरणवृत्तिर्जायते तां वृत्तिं वृत्तिविषयघटादिकञ्च स्वरूपप्रकाशेन यः प्रकाशयति स स्प्रष्टोच्यते। तस्य स्पृष्टिर्द्विविधा—एका अन्तःकरणवृत्तिरूपा त्वगिन्द्रियजा, अन्या स्प्रष्टुः नित्यचैतन्यज्योतिषः स्वरूपभूता। अत्र स्वरूपभूता स्पृष्टिः स्पृष्टिशब्देनोच्यते।

स्वः

स्वः—सद्रूपः। परमार्थसत्यभूत आत्मा।

स्वचित्तस्थः

स्वचित्तस्थः—स्वबुद्धिसाक्षित्वेन अवस्थितः। अनेनात्मज्ञाने सौलभ्यमुक्तं भवति। यथाग्निरुद्धतशिखः कक्षं दहति सानिलः। तथा चित्तस्थितो विष्णुः योगिनां सर्वकिल्बिषम्। इति

स्वतत्वम्

स्वतत्त्वम्—सर्वस्यापि प्रपञ्चस्य वास्तवं रूपम् ।

स्वतन्त्रः

स्वतन्त्रः—सृष्टिस्थितिसंहारेषु अन्यानपेक्षः ।

स्वप्रकाशः

स्वप्रकाशः—प्रमाणान्तरनैरपेक्ष्येण स्वयमेव प्रकाशत इत्यर्थः ।

स्वमहिमस्थः

स्वमहिमस्थः—स्पष्टम् ।

९८०

स्वे महिम्नि प्रतिष्ठितः

स्वे महिम्नि प्रतिष्ठितः—स्वे-आत्मीये महिम्नि-माहात्म्ये विभूतौ प्रतिष्ठितः । घटादिवदन्यत्राप्रतिष्ठितो भूमा, परिपूर्णत्वात् ।

स्वयञ्ज्योतिः

स्वयञ्ज्योतिः—आदित्यादिभौतिकज्योतिरनपेक्षतया चक्षुरादिबाह्यकरणानपेक्षतया अन्तःकरणानपेक्षतया च स्वयमेव प्रकाशत इति स्वयञ्ज्योतिः ।

स्वयम्भूः

स्वयमीश्वरः

स्वयमीश्वरः—स्वयमेव-ईशितव्यमनपेक्ष्यैव ईश्वरः, स्वतन्त्र इत्यर्थः । नह्यस्य सच्चिदानन्दरूपस्य तुरीयस्य सत्तायां स्फूर्तौ पुरुषार्थत्वे वा किञ्चिदपेक्ष्यमस्तीति स्वातन्त्र्यमस्य सिद्धम् ।

स्वराट्

स्वराट्—स्वयमेव राजमानः, स्वतन्त्रः । अन्ये तु तत्पारतन्त्र्यान्न स्वराजः ।

स्वर्गः

स्वर्गः—निरतिशयानन्दप्रकाशरूपः। परमात्मैवात्र स्वर्गशब्दार्थः। प्रकरणात् तस्यैव सुखरूपत्वात्तदंशत्वाच्चेतरस्य सुखस्य। तथा च श्रुतिः-एतस्यैवानन्दस्यान्यानि भूतानि मात्रामुपजीवन्तीति।

स्वर्गो लोकः

स्वर्गो लोकः—स्वर्गः—सुखरूपः लोकः—स्वप्रकाशः। आनन्दचिद्रूप इति यावत्

स्वात्मबन्धहरः

पूर्वोक्तम्----->सदोज्वलः

९८८

स्वात्मस्थम्

स्वात्मस्थम्—स्वे महिम्नि प्रत्यगात्मन्येवावस्थितं, न तु तदतिरिक्तमाधारमाधेयं वा किञ्चिदस्तीत्यर्थः।

हरः

हरः—अविद्यादेर्हरणात् हरः।

९९०

हरिः

हरिः—समूलं संसारं हरतीति हरिः।

हिततमः

हिततमः—परमात्मा, परमानन्दरूपत्वात्।

हिरण्यकेशः

हिरण्यकेशः—
हिरण्मयाः केशा यस्य स तथा। ज्योतिर्मयकेशो वा।

हिरण्मयः

हिरण्मयः—ज्योतिर्मयः।

हिरण्यपतिः

हिरण्यपतिः—हरणीयानामर्थानां स्वामी। हिरण्यस्यैव वा पतिः, आत्मीयत्वात्तस्य।

हिरण्यबाहुः

हिरण्यबाहुः—हिरण्याभरणाद्यलंकृतबाहुः। हिरण्यसदृशसर्वाङ्गो वा, बाहुग्रहणस्यो-
पलक्षणत्वात्। ज्योतिर्मयांगो वा।

हिरण्यश्मश्रुः

हिरण्यश्मश्रुः—हिरण्यसदृशानि श्मश्रूणि यस्य स तथा। ज्योतिर्मयश्मश्रुर्वा।

हेतुदृष्टान्तवर्जितम्

हेतुदृष्टान्तवर्जितम्—हेतुः—तृतीयान्तं पञ्चम्यन्तं वा वचनं कस्यचिदर्थस्य साधकम्।
दृष्टान्तः—यस्य कथनेन लौकिकपरीक्षकबुद्धिप्रसादः। ताभ्यां अनुमानं लक्षितम्। तद्वर्जितं

हंसः

हंसः—हन्ति गच्छतीति हंसः, अविद्यातत्कार्यं विनाशयतीति वा हंसः।

हृदयम्

हृदयम्—हृदययमात्मेति हृदयमित्यात्मनो नाम।

हृदिस्थः

हृदिस्थः—हृदि तिष्ठतीति हृदिस्थः। हृत्पुण्डरीकान्तरसन्निविष्ट इत्यर्थः।

हृदये सन्निविष्टः

हृदये सन्निविष्टः—हृदयपुण्डरीके बुद्धौ च सन्निविष्टः सम्यङ्निविष्टः-प्रत्यगात्मत्वेन स्थितः, तत्र अभिव्यक्त इत्यर्थः।

१००२

क्षेत्रज्ञः

क्षेत्रज्ञः—क्षेत्रं-शरीरं यथावज्जानातीति क्षेत्रज्ञः। किमिदं यथावत्त्वम्। शरीरस्य विण्मूत्रस्वेदश्लेष्मादिभस्त्रिकारूपत्वं त्वक्चर्ममांसरुधिरमेदोऽस्थिमज्जाद्यशुद्धात्मकत्वं पटलान्ततोयजलबुद्बुदादिवत् प्रतिक्षणं विनाशभयचकितत्वं आध्यात्मिकाधिदैविकाधिभौतिकतापत्रयपरीतत्वाद्-दुःखात्मकत्वं सुषुप्तमूर्च्छादिषु चेतनाराहित्यात् घटकुड्यकाष्ठलोष्ठादिसमत्वञ्च। अत एव नित्यशुद्धबुद्धमुक्तात्मस्वरूपभिन्नं एवंरूपं शरीरं करणं भोक्तृभोग्यरूपञ्च अनात्मत्वेन यो जानाति स क्षेत्रज्ञः। तथा च शरीरादिचतुष्टयमनात्मत्वेन त्यक्त्वा तत्साक्षिणि सच्चिदानन्दरूपे परमात्मनि आत्मत्वेन बुद्धिः कार्या श्रेयोऽर्थिभिरिति। अत्र शरीरादिचतुष्टयस्य दुष्टत्वं वैराग्यार्थमस्यामेवोपनिषदि प्रथम प्रपाठके बृहद्रथनामकराजरूपया श्रुत्या "भगवन्नस्थिचर्मस्नायुमज्जामांसशुक्रशोणितश्लेष्माश्रुदूषिकाविण्मूत्रवातपित्तकफसंघाते दुर्गन्धे निस्सारे अस्मिञ्छरीरे किं कामभोगैः, कामक्रोधलोभमोहभयविषादेत्यादिना" अन्धोदपानस्थो भेक इव अहमस्मिन् संसारे भगवंस्त्वंनो गतिः" इत्यन्तेन ग्रन्थेन वर्णितम्।

इति श्रीमत्परमहंसपरिव्राजकाचार्याभिनवनारायणेन्द्रसरस्वतीपूज्यपादशिष्य
श्रीमत्परमशिवेन्द्रसरस्वतीविरचिते
वेदान्तनामरत्नसहस्रव्याख्याने स्वरूपानुसन्धानाख्ये

तृतीयः पटलः

ग्रन्थश्च समाप्तः

ओम्

॥ श्रीगुरुमूर्तये नमः॥ श्री साम्बसदाशिवाय नमः ॥

१ ईशावास्योपनिषत्
२ केनोपनिषत्
३ कठोपनिषत्
४ प्रश्नोपनिषत्
५ मुण्डकोपनिषत्
६ माण्डूक्योपनिषत्
७ तैत्तरीयोपनिषत्
८ ऐतरेयोपनिषत्
९ छान्दोग्योपनिषत्
१० बृहदारण्यकोपनिषत्
११ ब्रह्मोपनिषत्
१२ कैवल्योपनिषत्
१३ जाबालोपनिषत्
१४ श्वेताश्वतरोपनिषत्
१५ बृहज्जाबालोपनिषत्
१६ हंसोपनिषत्
१७ आरुणिकोपनिषत्
१८ गर्भोपनिषत्
१९ नारायणोपनिषत्
२० परमहंसोपनिषत्
२१ अमृतबिन्दूपनिषत्
२२ अमृतनादोपनिषत्
२३ अथर्वशिरउपनिषत्
२४ अथर्वशिखोपनिषत्
२५ मैत्रायण्युपनिषत्
२६ कौषीतकिब्राह्मणोपनिषत्
२७ सुबालोपनिषत्
२८ नृसिंहोत्तरतापन्युपनिषत्

१ श्रीगौडपादाचार्याणां माण्डूक्यकारिका

२ श्रीमच्छंकर भगवत्पादाचार्याणां भाष्य-ग्रन्थाः, उपदेशसाहस्रीप्रपञ्चसारादि-प्रकरणग्रन्थाश्च।

३ श्रीमद्भगवद्गीता

४ ब्रह्मसूत्राणि

श्रीमत्सुरेश्वराचार्याणां

५ बृहदारण्यकोपनिषद्भाष्यवार्तिकम्

६ तैत्तरीयोपनिषद्भाष्यवार्तिकम्

७ पञ्चीकरणवार्तिकम्

८ नृसिंहोत्तरतापनीयोपनिषद्भाष्यवार्तिकम्

९ पञ्चपादिका

१० भामती

श्रीविद्यारण्यस्वामिनां

११ वार्तिकसारः

१२ तात्पर्यदीपिका-सूतसंहिताव्याख्या

१३ अनुभूतिप्रकाशः (विद्याप्रकाशः)
१४ पञ्चदशी
१५ अधिकरणरत्नमाला (वैयासिकन्याय-माला)
१६ शिवरहस्यम्
१७ शुकरहस्योपनिषत्
१८ वासिष्ठरामायणम्
१९ सूतसंहिता
२० विष्णुपुराणम्
२१ कूर्मपुराणम्
२२ तदन्तर्गता ईश्वरगीता
२३ ब्रह्माण्डपुराणम्
२४ आदित्यपुराणम्
२५ पराशरोपपुराणम्
२६ वासिष्ठलैङ्गम्
२७ लिङ्गपुराणम्
२८ स्कान्दम् (षट्संहितात्मकम्)
२९ स्कान्दम् (षट्खण्डात्मकम्)
३० पाद्मपुराणम्
३१ शिवपुराणम्
३२ शिवधर्मः
३३ विष्णुधर्मः
३४ शिवधर्मोत्तरः
३५ विष्णुधर्मोत्तरः
३६ भविष्यपुराणम्
३७ भविष्योत्तरम्
३८ श्रीमहाभारतम्
३९ श्रीमद्भागवतम्
४० पातञ्जलयोगसूत्राणि
४१ आगमाः
४२ शिवगीता
४३ विरूपाक्षपञ्चाशिका
४४ ललितास्तवरत्नम्
४५ सांबपञ्चाशिका
४६ शारदातिलकम्
४७ बह्वृचब्राह्मणम्
४८ उत्तरगीता
४९ पुरुषार्थसुधानिधिः
५० श्रीनारसिंहपुराणम्
५१ संक्षेपशारीरकम्
५२ गरुडपुराणम्
५३ प्रबोधचन्द्रोदयम्
५४ भर्तृहरिशतकम्
५५ परमार्थसारः (श्रीशेषकृतो ग्रन्थः)
५६ मृगेन्द्रसंहिता
५७ ब्रह्मवैवर्तपुराणम्
५८ सोमशंभुग्रन्थः
५९ पञ्चीकरणभावप्रकाशिका
६० सारसंग्रहः
६१ अभियुक्तवचनानि ,चेति ।